[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

॥ નિરક્ષમી[illegible] ॥

॥ પ્રથમોઽધ્યાયઃ ॥

॥ વેદપ્રમાણચર્ચા ॥

૧ વેદાઃ પ્રમાણં કર્ત્રનુપલબ્ધેરપૌરુષેયત્વાદિતિ ચેત્ ॥

૨ પ્રામાણ્યસ્ય કારણગુણાર્થત્વાન્નેતિ ચેત્ ॥

૩ જ્ઞાનસ્ય સ્વતઃ પ્રામાણ્યમન્યથાઽનવસ્થાપ્રસઙ્ગાત્ ન

૪. કારણદોષાભાવધારણં તદપવાદઃ ॥

૫ કારણાભાવે તદ્દોષાસંભવાત્ અનપવાદં પ્રામાણ્યમ્ ન

૬ શબ્દોત્પત્તેર્નેતિ ચેત્ ન

૭ અભિવ્યક્તિરવિશેષો ધ્વનિરચ્યતે ન

૮. વર્ણસઙ્ઘાતાનામર્થેષુ સઙ્કેતિતત્વાત્ સર્વે શબ્દાઃ
પૌરુષેયા ઇતિ ચેત્ ન

૯ ન સહજત્વાચ્છબ્દાર્થસમ્બન્ધસ્ય ॥

૧૦ ન તસ્ય મનોરનન્યત્વાત્ ॥

૧૧ લક્ષ્યેતન્ન સ[illegible]તિરિક્તત્વપ્રતીતેઃ

૧૨ સઙ્કેતે ચ ॥

૧૩ પદાન્યપિ પૌરુષેયાણિ નિત્યવાક્યાર્થાનાનુબન્ધપેક્ષત્વાત્ ન

૧૪ ધાતુપ્રાતિપદિકં ચ પૌરુષેયં વર્ણસઙ્ઘાતાના-
મર્થેષુ સઙ્કેતિતત્વાત્ ।

૧૫ શબ્દાર્થયોઃ સમ્બન્ધઃ સહજ ઇતિ ચેત્ ।

૧૬ અગૃહીતસઙ્કેતસ્યાપિ શબ્દતોઽર્થસ્ફૂર્તિઃ સ્યાત્-
તત્રાર્થબોધકત્વસ્ય સહજત્વે ।

૧૭ લોકે ભાષાવ્યુત્પત્તિર્ન સ્યાત્ ।

૧૮ ભાષાપરિણામસ્યાનુપપત્તેઃ ।

૧૯ દેશકાલભેદેન પદાર્થભેદસ્ય ચ,

૨૦ એવં વેદાઃ પૌરુષેયાઃ પુરુષબુદ્ધિવિલસિતત્વાત્ ।

૨૧ મધુચ્છન્દઃપ્રભૃતીનાં કર્તૃણામુપલબ્ધેઃ ।

૨૨ પ્રવચનમાત્રકારત્વા ઇતિ ચેત્ ।

૨૩ પરિહાર એવાયં હેત્વન્તરેણ ચેત્ નિત્યત્વં સિધ્યેત્ ।

૨૪ નિત્યત્વાસ્યાગૌણત્વકર્ત્રનુપલબ્ધ્યોર્નામિતરે-
તરાશ્રયત્વભ્રમણાચ્ચક્રકમ્ ।

૨૫ યસ્ય વાક્યં સ ઋષિરુચ્યતે ॥

૨૬ મન્ત્રસ્ય વિશિષ્ટમધ્યયનમ[illegible]ધારણ-
મધ્યયનં વા યદ્ધઃ પ્રવચનમ્ ।

૨૭ અપિ ચ ઋષયો મન્ત્રદ્રષ્ટાર ઉચ્યન્તે ન મન્ત્રપાઠકાઃ

૨૮ મન્ત્રાણાં દર્શનાત્ યેષાં ગૌણો વ્યવહાર ઇતિ ચેત્ ॥

૨૯ અનિયમસ્તત્વનુપલબ્ધાર્થે પ્રેક્ષા ॥

૩૦ શાખાપ્રેક્ષયા મન્ત્રકૃતઃ ॥

૩૧ નમો મન્ત્રકૃદ્ભ્ય ઇતિ બ્રાહ્મણાત્ ॥

૩૨ સુકર્મપાપમન્ત્રપુણ્યેષુ કૃઞઃ ઇતિ પાણિનિઃ ॥

૩૩ વાચા વિરૂપનિત્યયેતિ વચનપ્રામાણ્યાન્નિત્ય-
મિતિ ચેત્ ॥

૩૪ નિત્યત્વપ્રામાણ્યયોરિતરેતરાશ્રયઃ ॥

૩૫ સતતયા દૃશ્યમિત્ય મન્ત્રં કર્તું શક્યતે અગ્નિ-
સ્તુતિપ્રકરણસ્ય પ્રકૃતત્વાત્ ॥

૩૬ નિત્યાગ્નિહોત્રાદાવિવાર્થસંગતિઃ ॥

૩૭ ત્વામિમા વિરૂપે હાતા સમ્બોધ્યત ઇતિ
સ્પષ્ટં મન્ત્રસ્યાર્થત્વાત્ ॥

૩૮ વિરૂપનિત્યયેત્યેકં પદમિતિ ચેત્ ॥

૩૯ ન પૃથક્પદપાઠાત્ ॥

૪૦ નિગમેષ્વ[illegible]પાતકસમ્બોધનાનિ દૃશ્યન્તે ॥

૪૧ નોધાઃ સુવૃક્તિં પ્રભરા મરુદ્ભ્ય ઇતિ નોધસઃ ॥

૪૨ ઇન્દ્રં સમર્યે મહયા વસિષ્ઠેતિ વસિષ્ઠસ્ય ॥

४३ वैश्वानरदशकं नवकमिति वैश्वानरस्य विश्व-
मनसः ।

४४ अस्य मेध्यस्य सोमस्य सोभरे प्रेमध्वराय
पूर्व्यमिति सोभरेः ।

४५ अतिचारस्य संवादकथादर्शनात् ।

४६ तच्छ्रुतिसामान्यमात्रमिति चेत् ।

४७ तावद्देशानुवृत्तेः यावदसम्पूर्णं सहस्रशो
दृष्टानां मन्त्रवाचिनां निस्पष्टं वाख्यानम् ।

४८ दृश्यन्ते पुनर्मन्त्रपक्षपातिनामपि आख्यानानि
वः प्रतिकूलानि ।

४९ एकस्या आख्यानेन न चरितार्थम् ।

५० प्रवाहणस्य नाप्रसिद्धौ जैवलिः पञ्चाग्नि-
विद्याया उपदेशात् ।

५१ अतश्च रूढिप्रकरणतात्पर्यप्रयोग-
स्वभावाविरोधेनेतिहासस्य संवादकथानां
निसर्गानार्षकत्वम् ।

५२ वाक्यनन्यस्य पुरा प्रयत्नसापेक्षत्वात् ।

५३ परमेश्वरस्य वाक्यानि वेदास्तस्मादप्रामाणिकमन्ये

५४ ज्ञानप्रामाण्यस्य स्वतस्त्वे कारणगुणापेक्षत्वे वा
नात्र हानिः ।

५५ पदानां नित्यत्वे पुरापश्यन्त्यां निबद्धवर्णा-
वलीत्वे वा ।

५६ वाक्यार्थस्य पदार्थमात्रत्वे तदतिरिक्तत्वे वा ।

५७ शब्दार्थसम्बन्धस्य सहजत्वे सङ्केतितत्वे वा ।

५८ उभयपक्षे परमेश्वरसङ्केतं शक्तिं ब्रूमः ।

५९ देवभाषाशब्दानामेव न लौकिकभाषाशब्दानाम् ।

६० उभयत्रासुकाम्यविकृतयः ।

६१ काश्चित् स्वातन्त्र्येण मनुष्यसङ्केतितास्स-
विकृतयश्च ।

६२ यो भागो यस्य द्वारा भूमावतीर्णः स
तस्यर्षिः ।

६३ एवमृषयो मन्त्रद्रष्टारः ।

६४ मन्त्रकृतः उपचारात् ।

६५ परमेश्वरेणर्षिभिः सम्भाषणस्य नानुप
पन्नम् संवादकथादर्शनमविरुद्धम् ।

६६ परमेश्वरस्य त्रिकालज्ञत्वादनित्यार्थव्या-

૬૭ વાક્યબન્ધસ્ય પુરુષપ્રયત્નસાપેક્ષત્વ-
મત્ર ગુણઃ ।

૬૮ શાકલ્યાદીનાં સઙ્ગ્રાહકત્વેન સંહિતાકારત્વમ્ ।

૬૯ વેદાનાં પારમેશ્વરત્વે કિમ્પ્રમાણમિતિ ચેત્ ।

૭૦ તસ્માદ્યજ્ઞાત્ સર્વહુતઃ ૦ અજાયતેતિ નિગમઃ ।

૭૧ અસ્ય મહતો ભૂતસ્ય નિઃશ્વસિતમેતદ્યદૃ-
ગ્વેદઃ ૦ ઇતિ બ્રાહ્મણમ્ ।

૭૨ ન પ્રમાણત્વપરમેશ્વરવાક્યત્વયો રિતરેતરા-
શ્રયાત્ ।

૭૩ મન્ત્રો વિરાટ્પુરુષસ્ય પ્રકૃતત્વાત્ તસ્ય
વિશ્વરૂપત્વાત્ વિશ્વસ્મિન્ કાર્યે સર્વં તસ્યેતિ
ન સાક્ષાદ્બ્રહ્મકાર્યત્વસિદ્ધિઃ ।

૭૪ બ્રાહ્મણં ચ વિશ્વરૂપસ્ય પ્રકરણમવગમ્યતે ।

૭૫ અન્યથા પુરાણેતિહાસવિદ્યાશ્લોકસૂત્રવ્યા-
ખ્યાનાનુ આરમાનાનાં ચ સાક્ષાત્-
પારમેશ્વરત્વં પ્રસજ્યેત તેષાં ચ મહાભૂત-
નિઃશ્વસિતત્વેનોક્તેઃ ।

૭૬ ઋષિદર્શનાત્પ્રાગેવ સિદ્ધો મન્ત્રો વઃ

७७ नेश्वरर्षिसमावेशौ पूर्वेणापरमुख्यस्योक्ताः ॥

७८ अतः स्वतन्त्रेश्वरेण कृतमृषिसम्बोधनं
नोपपद्यते ॥

७९ तस्मान्नेश्वरवाक्यानि वेदाः ॥

८० परिमितकालअवस्थाख्यासंवादकथा-
दर्शनात् ॥

८१ ऋषिसन्ततिमात्रपूजितत्वात् ॥

८२ मन्त्रब्राह्मणयोर्भागशः परस्परभेदात् ॥

८३ मन्त्रेषु च ऋग्यजुरथर्वाङ्गिरसात् ॥

८४ एकत्रैव मन्त्रे संहिताभेदेन वर्णभेदात् ॥

८५ पाठभेदात् ॥

८६ स्वरितभेदात् ॥

८७ यावदेकर्षिभाषाशैलीसादृश्यात् ॥

८८ तद्भेदे तद्भेदात् ॥

८९ वक्तृभेदपरिहार्येभ्यः पुनरुक्तिदोषेभ्यः ॥

९० देवतानां प्रत्यक्षस्तुतिभ्यः ॥

९१ परार्थमिति चेद् यथार्थगुणवर्णनपराभ्यः
परोक्षस्तुतिभिरेव चारितार्थ्यदर्शनवशात् ॥

6

९२ साचिव्यादिस्तुतिवदर्थिगुणवर्णनरूपा ~~स्तुतिः~~—
प्रत्यक्षस्तुतिरप्युपपद्यत इति चेत् ॥
९३ अनत्यनुपपत्तिः ॥
९४ नहि त्वदन्यन्मघवन्न आप्यमित्याद्युदाहरणात् ॥
९५ आर्थित्वानुपपत्तिः ॥
९६ अश्वायन्तो मघवन्निन्द्र वाजिनो गव्यन्तस्त्वा
हवामहे इत्याद्युदाहरणात् ॥
९७ आपन्निवारणप्रार्थनानुपपत्तिः ॥
९८ हृद्रोगं मम सूर्य हरिमाणं च नाशय इत्या-
द्युदाहरणात् ॥
९९ पापनिवारणप्रार्थनानुपपत्तिः ॥
१०० क्षयन्नस्मभ्यमसुर प्रचेता राजन्नेनांसि
शिश्रथः कृतानि इत्याद्युदाहरणात् ॥
१०१ भयानुपपत्तिः ॥
१०२ मा नो मर्ता अभि द्रुहन्तनूनामिन्द्र गिर्वणः
इत्याद्युदाहरणात् ॥
१०३ स्तुतिकर्तृपदस्य स्वप्रकृतिपरत्वात् ॥
१०४ कुवित्सतिद्विषोयतीरिन्द्रेण सङ्गमामहै ॥

१०५ अवोचाम रहूगणा अग्नये मधुमद्वचः ॥

१०६ तं त्वा वयं पतिमग्ने रयीणां प्रशंसामो मतिभि-
गोतमासः ॥

१०७ इत्यादीनि प्रत्यक्षविषयोदाहरणानि ॥

१०८ तमु त्वा गोतमो गिरा रायस्कामो दुवस्यति ॥

१०९ अयं वां कृष्णो अश्विना हवते ॥

११० ता वां विश्वको हवते तनूकृथे ॥

१११ शुनःशेपो ह्यह्वद्गृभीतस्त्रिष्वादित्यं
द्रुपदेषु बद्धः ॥

११२ श्यावाश्वस्ते सवित स्तोममानशे ॥

११३ तस्मा उ ब्रह्मवाहसे गिरो वर्धन्त्यत्रयः ॥

११४ इत्यादीनि परोक्षविषया ॥

११५ औपम्यानुपपत्तेः ॥

११६ अहं प्रत्नेन मन्मना गिरः शुम्भामि कण्ववत्
इत्याद्युदाहरणात् ॥

११७ कर्तरि प्रत्ययाश्च लिङ्परत्वात् ॥

११८ प्रस्कण्वस्य श्रुधी हवम् ॥

११९ श्रोता हवं जरितुरेवया मरुत् ॥

१२० श्रुधी ह्वं तिरश्च्या इन्द्र यस्त्वा सपर्यति

१२१ इत्यादीन्युदाहरणानि ।

१२२ त्रासिकार्य लोके: ।

१२३ इन्द्राय ब्रह्म जनयन्त विप्राः ।

१२४ मत्पाग्यजान्यमा विशेन्द्रे भ्यो वा ऋस्ट दात । अF

१२५ इमे हि ते ब्रह्मकृतः सुते सचा मधौ न
मक्ष आसते ।

१२६ इत्यादीन्युदाहरणानि ।

१२७ स्वक्षमूर्णोणामात्मकृति स्थानात् ।

१२८ उत ब्रह्मण्या वयं तुभ्यं प्रवृद्ध वज्रिवः ।
विप्रा अतक्ष्म जीवसे ।

१२९ एवा ते गृत्समदाः शूर मन्मावस्यवो न
वयुनानि तक्षुः ।

१३० स्वायवो मतिभिस्तुभ्यं विप्रा इन्द्राय वाहः
कुशिकासो अक्रन् ।

१३१ अध प्रियं शूषमिन्द्राय मन्म ब्रह्मकृतो
बृहदुक्थादवाचि । (सो अक्र ।

१३२ एवा ते हारियोजना सुवृक्तीन्द्र ब्रह्माणि गोतमा-

१३३ इत्यादीन्युदाहरणानि ॥

१३४ अहं राष्ट्री सङ्गमनी वसूनामित्यात्मस्तुतौ स्त्रीलिङ्गानुपपत्तेः ॥

१३५ इन्द्रब्रह्मा क्रियमाणा जुषस्व या ते शविष्ठ नव्या अकर्मेति नवत्वानुपपत्तेः ॥

१३६ अङ्गिरसां पूर्वपितृत्वानुपपत्तेः ॥

१३७ येना नः पूर्वे पितरः पदज्ञा अर्चन्तो अङ्गिरसो गा अविन्दन् इत्याद्युदाहरणात् ॥

१३८ दानस्तुतिभ्यश्च ॥

१३९ अन्यान्यपि सन्ति साक्षात्पारमेश्वरत्वस्य प्रतिकूलान्यपि तस्यानुकूलानि तादृन्युदा-हरणानि निगमेषु ॥

१४० ब्राह्मणानि च नेश्वरवाक्यानि मध्यम-कालभावायोगात् ॥

१४१ अर्वाचीनजीवन्मवायुपदेशानामेव विद्यासु प्रायः उपन्यस्तत्वात् ॥

१४२ आर्षमन्त्र आख्यानात् ॥

१४३ विविधाचार्यमतप्रदर्शनात्

१४४ स्वोक्तिसाधनायर्षिमन्त्राणां प्रमाणत्वेन
प्रदर्शितत्वात् ॥

१४५ मतभेददर्शनात् ॥

१४६ शाखाभेदेन व्यवस्थार्थं भेदोपदेश
इति चेत् ॥

१४७ तत्कण्ठरवेण वक्तव्यं न चोक्तम् ॥

१४८ आसङ्गतिर्मितान्धकारनिन्दायाः ॥

१४९ अर्वाचीनत्वस्य शाखाभेदः ॥

१५० शाखाभेदाद्धर्मस्वरूपं भिद्यत इति
शक्यमात्रम् ॥

१५१ अनृतकथाबाहुल्यात् ॥

१५२ विधिप्रशंसार्थवादा इति चेत् ॥

१५३ प्रभोर्नाविलेषु नैतादृशीकुनीतियुक्ता ॥

१५४ आर्षदर्शनत्वान्निगमाः प्रमाणमिति
वाचिकाः ॥

१५५ हृदयेन दृष्टविरचितत्वं ॥

१५६ तादृशं दर्शनमार्षदर्शनम् ॥

१५७ हृदयमन्यमनसः

१५८ जुह्वाति सन्तु मनसे हृदे च इत्यादौ भेद-
निर्देशात् ॥

१५९ अभ्यासनिग्रहौ तेन मनसो हृदयस्याश्रयतः
इति लौकिकस्य कविप्रयोगः ॥

१६० अन्तर्यामि स्थानमित्युक्तं भवति ॥

१६१ अत एव "हृदि विशमनसा संचिन्वतामऽऽज्ञातावा
इत्याचार्याः ॥

१६२ यावदिन्द्रियैः ~~[illegible]~~ गृह्णाति
तावन्मनसो विषयः ॥

१६३ अतीन्द्रियेष्वपि हृदयस्य गतिरन्तर्यामि-
करणत्वात् ॥

१६४ तदानन्दमयात् कोशान्नातिरिच्यत इति
वासिष्ठः ॥

१६५ मनो हृदयस्यो मध्ये विज्ञानात्मा यं जीवं
अवहरन्ति ॥

१६६ तस्य स्वभावतो मनः करणम् ॥

१६७ वाचा सह चक्षुरादीनि मनोवशवर्तीनि भवन्ति ॥

१६८ हृदयंकरणं स्यात् सर्वविद्यामूलत्वे ।
अन्तरात्मनि प्रतिष्ठां विन्देत् ।
१६९ यदा तस्य मनोवाग्दृष्टीन्द्रियाणि च हृदय-
वशवर्तीनि भवन्ति ।
१७० हृदयं स्वयं च पश्येत् मनःसहकृतै-
रिन्द्रियैश्च पश्येत् ।
१७१ पूर्वं दर्शनमलौकिकम् ।
१७२ उत्तरं लोकसाधारणम् ।
१७३ उभयं चापि दर्शनं हृदयमूलकत्वात् ।
१७४ ऋषिभिर्वाक्यात्मना निबद्धानि आत्म-
दर्शनानि निगमाः ।
१७५ तत्र पद्य गद्य गीतीनाम् ऋग्यजुः सामाख्यानि
१७६ अथर्वाङ्गिरसां यथालक्षणम् ऋग्यजुषो-
रन्तर्भावः ।
१७७ त्रयी पूर्वैरनन्तरमुत्पन्नत्वात् पृथगभिधानकं
१७८ प्राधान्ये गीतीनाम सहकारित्वेन सामवेदो-
ऽथर्विक इविचेत् ।
१७९ वेदाः पवित्रभजनग्रन्था न केवलं प्रमाणग्रन्थाः ।

१८० गीतीनां सुतरां भजनोपयोगित्वात् सार्थक्यम् ।

१८१ प्राचीनपद्यस्यैव गेयता इति नियमो नोपपद्यत इति चेत् ॥

१८२ स केवलं साम्प्रदायिकः ।

१८३ नवापि शास्त्रीयपूर्वपद्धतिरनिषिद्धा ।

१८४ केवलं हार्दार्थदर्शनानुवादिनां निगमानां योग-प्रत्यक्षानुवादित्वात् ।

१८५ करणान्तरसहकृतहार्दार्थदर्शनानुवादिनां प्रत्यक्षानुवादित्वमनुमानानुवादित्वं वा ।

१८६ उत्तरत्रापि न भ्रमादिसम्भवो ज्ञानस्य दिव्यकरणानुगृहीतत्वात् ।

१८७ सहकारिदोषाद्दोषसम्भव इति चेत् ।

१८८ हृदयशक्तिसहकृतानां न दोषावकाशः ।

१८९ प्रसिद्धेर्निगमानामार्षदर्शनत्वावगतिः ।

१९० पारमेश्वरत्वप्रसिद्धिश्च नैतत्प्रतिकूला ।

१९१ वेदाः काव्यानि वेधस उत्पन्ने करणस्य तदीयत्वात् ।

१९२ ऋषीणामनुत्पन्नत्वे तेषां द्रष्टृत्वात् ।

Shri Kavyakantha
Vashistha Ganapati Muni

૨૦૫ પવિત્રમન્ત્રાવલમ્બનત્વાત્ સત્સુ દેવતાપરત્વાચ્ચ
બ્રાહ્મણોક્તાઃ કલ્પાઃ શ્રેયસે નિઃસંશયં
યેષુ ન હિંસા ।

૨૦૬ યેષુ હિંસા તત્ર સંશયઃ પુણ્યપાપયો-
ર્મિશ્રત્વાત્ ।

૨૦૭ તદુત્તરત્ર વિચારયિષ્યામઃ ।

૨૦૮ ઉપનિષત્સ્વીશોપનિષત્પ્રામાણ્યં નિગમૈ-
ર્વ્યાખ્યાતમ્ ।

૨૦૯ અન્યા આચાર્યપરમ્પરાપ્રાપ્ત રહસ્યવિદ્યા-
નિબન્ધનગ્રન્થાઃ ॥

૨૧૦ યાવત્યો બાદરાયણેન મીમાંસિતાસ્તસ્ય
સાકલ્યેન તન્મીમાંસકત્વાત્ ।

૨૧૧ અન્યા અર્વાચ્યામવેદશાખાનુબદ્ધાઃ ॥

૨૧૨ તાસાં તત્તદ્વેદશાખાનુબદ્ધત્વેન પ્રદર્શનં ગૌરવાર્થં
કલ્પના વૈભવમ્ ॥

૨૧૩ રહસ્યવિદ્યાનાં મૂલમાર્ગદર્શનમિતિ
તાસાં તદ્વત્પ્રામાણ્યમ્ ॥

૨૧૪

२१४ निगमेषु प्रकारः एव ग्रन्थकृतः उपनिषत्सु
परम्परोपदिष्टार्थाः इति विशेषः ।

२१५ एकैका मन्त्रसंहिता ऋक्सामाथर्वाङ्गिरसाम् ।

२१६ यजुषां द्वे शुक्ला कृष्णा चेति ।

२१७ उत्तरा यजुष्काण्डैव ग्राह्या ।

२१८ इतरतः इतरन्न ग्रहणं संहिताकारस्य कुसमम् ।

२१९ ऋक्संहिताक्रमो ग्राह्यः ऋच्यामर्थविचारे ।

२२० ऋक्संहितापाठः पाठभेदेषु यथादृष्टविचारे ।

२२१ पाठभेदः साम्प्रदायिक इत्येके ।

२२२ प्रामाणिक एवेति वासिष्ठः ।

२२३ मन्त्रसंहिताः पञ्च, केनकठप्रश्नमुण्डक-
माण्डूक्यतैत्तिरीयैतरेयच्छान्दोग्यबृहदा-
रण्यकश्वेताश्वतरकौषीतकिब्राह्मणो-
पनिषदः एकादशा चेति षोडश प्रमाण-
ग्रन्थाः प्रमाणग्रन्थाः ।

॥ द्वितीयोऽध्यायः ॥

॥ वाक्यप्रामाण्यपद्धतिविचारः ॥

२

१ मन्त्रेषु भावार्थकर्मशब्दाभावान्न तैरपूर्वं विधीयते ॥

२ तेषु व्याख्यातानि सन्तीति चेत्

३ प्रयोगेषु यज्ञाङ्गप्रकाशनमात्रेण गतार्थत्वात् पुनर्विधातुमशक्तिः ॥

४ न त्वेष न्यायः प्रमाणस्य सतः पवित्रतातिशयादभ्युदयाय प्रयुक्तत्वात् ॥

५ एकैकप्रकाशनेन गतार्थत्वेऽन्यत्रान्यप्रकाशस्यानुपपत्तिः ॥

६ मन्त्रैरिष्टानि साधयितुं ब्राह्मणस्थकर्मकल्पाः पुराणात् ॥

७ न कर्मकल्पानामङ्गानि मन्त्राः ॥

८ उपकार्योपकारकभावस्तेषां परस्परम् ॥

९ सिद्धेषु मन्त्रेष्वनन्तरं हि कर्मकल्पाः प्रवृत्ताः ॥

१० उक्तो मन्त्रब्राह्मणयोः पौर्वापर्यभावः ॥

११ तथापि कर्मकल्पं विना मन्त्राणामानर्थक्यम् ॥

१२ अभिधानचोदकत्वान्मन्त्रस्याभिधानस्य च
क्रियान्वये प्रयोजनाभावात् ॥

१३ क्रियाविधायकत्वमप्यस्तीति चेत् ॥

१४ न विधायकशब्दाभावात् ॥

१५ फलकल्पनाद्विधिकल्पनमिति चेत् ॥

१६ वाक्यभेदः ॥

१७ अयमेव भावार्थः कर्मशब्दो यत्क्रियाविधायको
न सर्वमाख्यातम् ॥

१८ भावश्च कस्यचिन्निष्पत्तिः ॥

१९ भूतिर्भवनं भाव इत्यनर्थान्तरम् ॥

२० यजेतेत्यस्य यागेन किमपि भावयेदित्यर्थः
स्यात् ॥

२१ तद्यथा स्वर्गादिफलं यागोत्पन्नापूर्वसाध्यम् ॥

२२ अपूर्वमाख्यातस्यार्थः ॥

२३ एवमपूर्वचोदकत्वं विधिशब्दानाम् ॥

२४ चोद्यत इत्यपूर्वं चोदना ॥

२५ तस्माद् धर्मो नातिरिच्यते धर्मस्य चोदना-
लक्षणार्थत्वात् ॥

२६ अपूर्वोत्पादकं कर्म वा धर्मः ॥
२७ तस्यापि चोदनालक्षणार्थत्वात् ॥

२८ चोदनया लक्ष्यत इत्यत्र नयः ॥
२९ चोदना चात्र प्रवर्तकं वचनम् ॥
३० उभयत्राप्यपूर्वस्य विध्यर्थकारत्वात् प्रति-
पाद्यत्वं तुल्यम् ॥
३१ नैवायुक्तिर्यागेन स्वर्गं भावयेदिति
भवतां नयात् ॥
३२ अयं चार्थिनः स्वर्गकामत्वे ॥
३३ यथाकामं भावनमित्युक्तं भवति ॥
३४ कामानुरूपाणि यथाश्रुतिकर्माणि ॥
३५ एवं स्थिते स्वर्गस्य सिद्धत्वेनानुत्पाद्यत्वा-
दर्थासङ्गतिः ॥
३६ स्वर्गो न लोकः सुखमात्रस्य तदाख्येति चेत् ॥
३७ प्रसिद्धार्थपरित्यागोऽप्रसिद्धार्थकल्पनं च ॥
३८ अनुपपत्तेर्विरोधान्मुख्यार्थपरित्यागेन
लक्ष्यार्थग्रहणमिति चेत् ॥
३९ न स्वर्गोत्पत्तेर्वचनेनानुकूलत्वात् ॥
४० पशुकामश्रुतावितोऽपि स्पष्टं विरोधोदाहरणम् ॥

૪૧ સર્વત્ર યથાશ્રુત કામ સાધક મપૂર્વં ભાવયેદિતિ
નય એવ સ્વીક્રિયત ઇતિચેત્ ॥

૪૨ તત્ કિંરૂપમ્.

૪૩ અદૃષ્ટ માનિર્વચનીયમિતિચેત્ ॥

૪૪ તાદૃશં વિચિત્ર પદાર્થં ભાવયિતું કસ્ય શક્તિઃ ॥

૪૫ ન બ્રાહ્મણ વચનસ્યા પ્રમાણત્વાત્ ॥

૪૬ તદ્વિના પૌરુષેયં નચેશ્વરવાક્યં નવાપિદર્શનમ્ ॥

૪૭ તથા યદિ તદુક્તં કર્મ કથં શ્રેયસ ઇતિચેત્ ॥

૪૮ ઉક્તો હેતુરુક્તાશ્ચૈકદેશે સંશયઃ ॥

૪૯ પ્રમાણ ત્વેવા ન શક્તિ રસંબદ્ધં બોધયિતું
સતિસમ્બદ્ધે ॥

૫૦ ધનાર્થી રાજાનમાશ્રયેતેતિ લૌકિકનીતિવાક્ય
આશ્રયણે ન રાજ્ઞઃ પ્રીતિં ભાવયેત્ તતો ધનલાભઃ
સ્યાદિત્યર્થો ભવતિ ॥

૫૧ એવં જ્યોતિષ્ટોમેન સ્વર્ગકામો યજેતેતિ અત્ર યાગેન
દેવતાપ્રીતિં ભાવયેત્ તતઃ સ્વર્ગલાભઃ સ્યાદિત્યર્થો
ભવેદૃજુમાપયા ॥

૫૨ યજે દેવતારાધનાર્થત્વાત્ ॥

५३ तस्य मन्त्रीयोगो न निष्फलः स्यात् ।

५४ यागे मन्त्रैरभीष्टदेवताप्रीतेरङ्गित्वात् ।

५५ लोकेऽपि काम्यकर्मसु समुद्दिष्टदेवताप्रीत्यर्थं
इत्यारम्भसङ्कल्पना नापूर्वोत्पादनार्थमिति ॥

५६ देवताप्रीयतामित्युपसंहारो नापूर्वमुत्पद्यतामिति ।

५७ देवता कल्पितेति चेत् ।

५८ मन्त्राणामभिधानवाचित्वेन प्रामाण्यस्य हानिः ।

५९ अग्निवायुसूर्यादौ तन्नामप्रयोगाज्जडेति चेत् ॥

६० सपूर्वैनं भूतिं गमयतीत्याद्यनुपपत्तेः ।

६१ बहुलं विचारयिष्यामः एतद्देवतास्थापनावसरे ।

६२ तथापि यागं विना मन्त्रदेवतयोः सामर्थ्यम् ।

६३ यागश्च मन्त्रैर्निर्वाह्यते ॥

६४ उक्तो हेतुरावृत्तश्च विधिकल्पने विरोधः ॥

६५ न चास्ति मन्त्राणामभिधानवाचित्वमेवेति नियमः ।

६६ तेषां च लौकिकवाक्यवद्देवार्थेषु गतिः ।

६७ भूतं भव्यं चेति शब्दप्रमाणस्य गतिर्द्विधाम्नायात् ।

६८ सिद्धं वस्तु भूतम्

६९ तदभिधानं जैमिनेर्नाम्नायात् ।

૭૦ પ્રસંગેણોદાહરણાનામ્

૭૧ [illegible]પક્ષે કર્મિ ગમ્યમ્ ।

૭૨ પૂર્વત્ર વસ્તુસ્વરૂપકથનમ્ ।

૭૩ ઉત્તરત્ર કર્તવ્યતોપદેશઃ ।

૭૪ તત્ર જ્ઞાનસ્ય મોક્ષહેતુત્વાત્ સિદ્ધવસ્તુસ્વરૂપ-
કથનં પ્રયોજનવદિતિ વેદાન્તિનઃ ।

૭૫ ક્રિયાઙ્ગવસ્તુજ્ઞાનં ક્રિયાસમ્પત્ત્યૈ તસ્માત્પ્રયો-
જનવદિતિ મીમાંસકાઃ ।

૭૬ પ્રયોજનવાનર્થ એવ વેદપ્રતિપાદ્ય ઇત્યુભયે ।

૭૭ ભૂતાર્થવાદસ્ય સ્વાર્થે પ્રમાણત્વેઽપિ ન સાક્ષાત્
પ્રયોજનવત્ત્વં તસ્માત્સંશય ઇતિ તેષાં દૃષ્ટિઃ ।

૭૮ શબ્દપ્રમાણસ્યાપિ પ્રમાણાન્તરવત્ પ્રયોજનાન-
પેક્ષયૈવ ગતિરિતિ વાર્તિકજ્ઞઃ ।

૭૯ પ્રમાતૈવ પ્રમેયાન્તરવત્ શબ્દપ્રમેયેઽપિ પ્રયોજનં
મૃગયતે ।

૮૦ તત્રૈતદપેક્ષયા તસ્યાધિકારઃ પ્રયોજનકામ ઇતિ
વિશેષઃ ।

૮૧ નૈવં શબ્દપ્રમાણાન્તરયોર્ભેદાત્ ।

८२ आम्रोडहि दृष्टमर्थं सावलप्रयोजनं ग्रन्थे निदध्यात् ।

८३ न ह्येव नियमः कवीनाम् ।

८४ कवयो हि निरङ्कुशाः ।।

८५ तन्त्रोक्तस्य पुनर्वचनं दोषाय ।। (सर्वथा)

८६ काम्योक्तस्य अङ्गान्तरेण पुनर्वचनं शोभायै ।

८७ त्वां स्तोमा अवीवृधन् त्वामुक्था शतक्रतो ।।
त्वां वर्धन्तु नो गिरः ।। इति स्तुता ।।

८८ इन्द्रमिद्गाथिनो बृहदिन्द्रमर्केभिरर्किणः ।।
इन्द्रं वाणीरनूषतेति अङ्गान्तरेण पुनरिन्द्रं
स्तौति मधुच्छन्दाः ऋषिः ।

८९ एकार्थवर्णिनाद्दृष्टोऽर्थो मन्त्रद्वये वर्णितः ।

९० अन्यतरोऽनर्थकस्तन्त्र दृष्ट्या ।।

९१ लोकसिद्धार्थप्रतिपादनं तन्त्रे तु दोषाय ।।

९२ तदेव सालंकारं चेत् काम्ये तु शोभायै ।

९३ इमान्त राजा वनान्यत्ति इति अग्निं स्तौति
पराशर ऋषिः ।

९४ इदमनर्थकं तन्त्र दृष्ट्या ।।

९५ व्यास काम्य दृष्ट्या ।

९६ अलङ्कारास्तन्त्रेऽनावश्यकाः ।

९७ काव्येषु शोभायै ॥

९८ उक्तमर्थालङ्कारोदाहरणम् ।

९९ नातारभिन्दं॰ इत्यादौ शब्दालङ्कारा अपि
दृश्यन्ते ॥

१०० वृत्तार्थानुवादो विधेः पोषक एव तन्त्रेषु भवति ।

१०१ काव्येषु स्वतन्त्रः ॥

१०२ अत्र आर्षकाव्येषु दानस्तुसादृश्य उदाहरणम् ।

१०३ इत्यादि वैलक्षण्यं तन्त्रेभ्यः काव्यानाम् ।

१०४ निगमाँस्तान्त्रीकर्तुं ~~[illegible]~~ तन्त्र विद्वांसः यतन्ते

॥शब्दप्रमाणचर्चा॥

॥वेदप्रामाण्याधिकरणम्॥

१ वेदाः प्रमाणमाप्तवाक्यत्वादेकेषाम्॥

२ ईश्वरवाक्यत्वादपरेषाम्॥

३ अकृतकत्वेनदोषाप्रतिष्ठानादितरेषाम्॥

॥तृतीयमते दोषाः॥

४ विप्रतिषिद्धमिदं यदकृतकानि वाक्यानि॥

५ कर्तुरनुपलब्धेर्वेदवाक्यान्यकृतकानीतिचेन्न मधुच्छन्दःप्रभृतीनामुपलब्धेः॥

६ प्रवचनादारम्भ इतिचेत् परिहार एवायं कारणान्तरेणचेत् सिध्यति नित्यत्वम्॥

७ इतरेतराश्रयस्य नित्यत्वारम्भगौणत्वयोः॥

८ वचनप्रामाण्यान्नित्यत्वमितिचेत् एवमपीतरेतराश्रयो नित्यत्वप्रामाण्यत्वयोः॥

९ दृश्यन्तेचानित्यत्वे वचनानि॥

१० यज्ञादिति नारायणस्यार्षे मन्त्रे॥

११ स्वस्य शाखा विदधेति हिरण्यस्तूपस्य॥

१२ हृदा तष्टा इति पराशरस्य॥

१३ स्वरूपमात्रकृतिरत्रानं बहूनामपीणाम् ॥

१४ नियमे तु विरूपस्यैकस्य ॥

१५ एवं निगमानां वैधसत्त्वे पारमर्थत्वे नियमे च वचनानि भवन्ति ॥

१६ अन्यतमस्य मुख्यत्वं शेषयोर्गौणत्वं च निर्धारयितुं वाक्यतात्पर्यमेव विचारयितव्यं स्यात् ॥

१७ वाक्यस्य वक्तृतात्पर्यज्ञाने नियमप्रातिकूल्यं निरस्यात् ॥

१८ शब्दस्य नियमत्वान्नेति चेत्तद्वर्णाभिप्रायम् ॥

१९ पदान्यपि नियमान्याहुर्वैयाकरणा इति चेत् लौकिकानां च नियमत्वं स्यात् ॥

२० अनित्यार्थसंयोगान्नेति चेत् एकदेशपरिहार एवायम् ॥

२१ अनित्यत्वापत्तिश्च वैदिकैकदेशे ॥

२२ तच्छ्रुति सामान्यमात्रमिति केवलः प्रौढिवादः ॥

२३ परः सहस्राणि पदानि प्रातिपदिकव्यतिरेकेण प्रकरणविशेषेण च युक्तान्यारभ्य यानि स्युः ॥

२४ तावदेवायुक्तानि शेषमते यावदसम्पूर्णं वाक्यारम्भ- णम् ॥

૪૮ અભક્તં શબ્દાયતે ઇત્યેવ યજ્જાનાતીતિ ॥

૪૯ સમષ્ટેઃ કરણં વ્યષ્ટેઃ સ્વં સ્યાત્ તયોર્બલાત્

યથાપરસ્તના યોગ ~~[illegible]~~ નિદ્રાયા મધુના લોકે ॥

૫૦ કાણાદાદિષુ દર્શનવ્યવહારો ભાક્તઃ ॥

॥ દ્વિવિધપરશબ્દાધિકરણમ્ ॥

૫૧ આપ્તવાક્યં દર્શનં ચ પૃથગેવ પ્રમાણે ॥

૫૨ પ્રત્યક્ષાનુમાનાદિપ્રમિતાનુવાદ આપ્તવાક્યમ્ ॥

૫૩ વેદાર્થાનુવાદશ્ચ ॥

૫૪ અપરોક્ષપ્રમિતાભિવ્યક્તિર્દર્શનં યસ્ય વેદાખ્યા ॥

૫૫ યદ્યપ્યપરોક્ષમેવ દર્શનં તથાપિ તદભિવ્યક્તિ-

રૂપેણાવમે તદ્ભેદઃ ॥

॥ પ્રસિદ્ધ્યધિકરણમ્ ॥

૫૬ પ્રસિદ્ધેર્વેદાનાં દર્શનત્વાવગતિઃ ॥

૫૭ પ્રસિદ્ધિરિહ પરમ્પરાનુબન્ધિન આપ્તવાક્યત્વાતિ-

રિચ્યતે ॥

૫૮ નનુ ઋષિદર્શિતમિતરસ્યાપ્રત્યક્ષમ્ ॥

૫૯ યદ્યત્ર પ્રત્યક્ષં તદિતરાવિરોધમ્ ॥

૬૦ અનુમિતયે નાનૈકાન્તિકલિઙ્ગલાભઃ ॥

૬૧ [illegible]કીતિ ચેદ્ દર્શનત્વપ્રામાણ્યયોરિતરેતરાશ્રયઃ ॥

૬૨ તસ્માન્ન પ્રસિદ્ધિઃ પ્રમાણમિતિ ચેત્ ॥

૬૩ [illegible]ષિરાત્મનોઽભિવ્યક્તં વાક્યં વિલક્ષણપ્રાદુર્ભાવત્વાદ્ દર્શનં પ્રકટયતિ તત્પ્રસિદ્ધિમૂલમૃષિવાક્યમ્ ॥

૬૪ ..તથા અસ્મદાદિતોઽનનુભૂતવાદ્ મૂલો ન મન્ત્રદ્રષ્ટા સ્યાત્ તાદૃશોઽહમદ્રાક્ષમિતિ વદન્નાનૃતવચનોઽનુમાતું શક્યઃ ॥

૬૫ દર્શનત્વપ્રસિદ્ધિપેક્ષિકૈવ વેદાનાં પારમેશ્વરત્વપ્રસિદ્ધિઃ ॥

૬૬ પ્રસારવ્યાતં ભવતા તદિતિ ચેત્ તત્સર્વથા પારમેશ્વરત્વનિરાસાર્થમ્ ॥

॥ પારમેશ્વરત્વાધિકરણમ્ ॥

૬૭ વેદાઃ કાવ્યાનિ વેધસ ઉચ્યન્તે કરણસ્ય તદીયત્વાત્ ॥

॥ આર્ષત્વાધિકરણમ્ ॥

૬૮ ઋષીણાં ભણ્યન્તે તેષાં દ્રષ્ટૃત્વાત્ ॥

॥ સોપાધિકત્વાધિકરણમ્ ॥

૬૯ અભિવ્યક્તૌ સાન્નિકૃષ્ટત્વાદૌપાધિકત્વમિષ્ટમ્ ॥

૭૦ ઉપાધિરત્ર ઘટદુન મૃદ આકૃતિ વિશેષો નાર્થાન્તરમ્ ॥

૭૧ અભિવ્યંજકત્વે સમષ્ટેઃ શક્તિઃ વ્યષ્ટેર્નુત્પત્તિ- રિત્યુક્તં ભવતિ ॥

૭૨ એતેન ભાવાગતિભેદ સાદૃશ્યે વ્યાખ્યાતે ॥

॥ કામાદિ પ્રતિબિમ્બિતત્વાધિકરણમ્ ॥

૭૩ કામાદિઃ સમષ્ટાવનુપપન્ન ઇતિ ચેત્ વ્યષ્ટેરેવાયં પ્રતિબિમ્બિતઃ ॥

૭૪ સમષ્ટિ વિજ્ઞાન ચક્ષુષા વ્યષ્ટિ વિજ્ઞાન પ્રતિબિમ્બા- નાં ચ દર્શનમવિરુદ્ધમ્ ॥

૭૫ વ્યષ્ટિ દર્શિનકર્તાઽન્યો વા ॥

૭૬ ભ્રમસંશયયોશ્ચ પ્રતિબિમ્બિતત્વાપત્તિરિતિ ચેત્ ॥

૭૭ અપ્રમાભૂમિકત્વાદબાધઃ ॥

૭૮ એતેન જ્ઞાન પ્રતિબિમ્બનં વ્યાખ્યાતમ્ ॥

૨

॥ नित्यत्वाधिकरणम् ॥

७९ [illegible] : प्रणवे घटा इव मृदि स नित्यः ।

८० तन्मूलत्वाद्वेदनित्यत्वप्रसिद्धिः ।

८१ ऋचो अक्षरे परमे व्योमन् इति भगवतः
औचथ्यस्य दीर्घतमसो दर्शनमत्र भवति ।

८२ अविभक्ततया प्रणवे वेदाः ।

८३ विभक्ततया दर्शनेषु ।

८४ सर्वाणि ज्ञानान्येव निलीयन्ते महत्यन्तःकरणे-
ऽवधानात् ।

८५ महत्यन्तःकरणे स्मरणबीजानुभवा इव समष्टि-
करणे वेदबीजानुभवाः स्युः सा स्थिति-
रविभक्ता ।

८६ समष्टिकरणं च प्रणवान्नातिरिच्यते ।

॥ दर्शनभेदाधिकरणम् ॥

८७ विभक्ततया प्रादुर्भावे व्यष्टिज्ञानप्रतिबिम्ब-
रहितं शुद्धम् ।

८८ तत्सहितं मिश्रम् ।

८९ यद्यप्यनुभवप्रामाण्ययोरुभयं तुल्यं तथाप्युत्तरत्रा-
नित्यार्थसंयोग इति पूर्वं ज्यायः

॥ वेदपदप्रवृत्तिनिमित्ताधिकरणम् ॥

९० ऋग्यजुःसामान्यथर्वाङ्गिरसश्च वेदपद-
प्रवृत्तिनिमित्तम् तैरेव विशेषितत्वाद्वेदपदस्य ॥

९१ ब्राह्मणानि चेत्येके ॥

९२ नादर्शनत्वादिति कपाली भारद्वाजः ॥

९३ काव्यादिवदेव ब्राह्मणवाक्यनिर्माणाद् ॥

९४ तत्र शक्तिव्युत्पत्ती उभे अपि भट्टैरेव सुवक्तुं भवतः

९५ तथापि तत्र कर्मणां भावानां च विधयः तद्वाक्यार्थास्तु
दर्शनान्येव ब्राह्मणानीति वासिष्ठः ॥

९६ निषेधानां च विधिषु संग्रहः ॥

९७ मन्त्रदर्शनेषु वाक्याविर्भावपर्यन्ता समाधि-
शक्तिलीला ब्राह्मणस्य विधिदर्शनेषु तदर्थ-
स्फुरणपर्यन्तेति विशेषः ॥

९८ वाक्यकरणमृषेरन्यस्य वा श्रुततदर्थस्य ॥

९९ तस्माद्ब्राह्मणानां वेदत्वं नासङ्गतं यावद्दर्शनवत् ॥

१०० तेषामादेशाख्या ॥

१०१ शब्दवैलक्षण्यादवेदत्वमेव तेषामिति चेन्मास्तु
जपादौ विनियोगस्तेषामदृष्टादर्शनत्वं कोऽनिवा-
(रयेत

॥ आदेशप्रामाण्यस्वरूपाधिकरणम् ॥

१०२ आदेश आप्तवाक्यं स्यादनुवादत्वादिति चेन्न ॥

१०३ नैवं स्याद्वाक्यस्य तुल्यार्थं वाक्यं ह्यनुवादः ॥

१०४ ज्ञानस्य वांश्येन प्रकरणमन्यत् ॥

१०५ प्रत्यक्षानुमानप्रमित प्रकरणेषु विषयलिङ्ग-
सन्निधावनुवादत्वं तदसन्निधौ त्वनुवादत्वं
स्यात् ॥

१०६ बाह्यविषयलिङ्गानायत्तत्वादपरोक्षदर्शन-
मितौ विलक्षणम् ॥

१०७ तत्प्रकरणात्मनात्मादेशानां तद्वदेव प्रामाण्यं
युक्तम् ॥

॥ शेषब्राह्मणाधिकरणम् ॥

१०८ शेषो ब्राह्मणमात्रम् ॥

१०९ तत्रार्थव्यादेशोपबृंहकः पुराणबुद्धिविलासः ॥

११० तस्य वेदपदेन व्यवहारो वेदानुबन्धित्वात् ॥

१११ तत्र भूताभिवादः स्यादाप्तवाक्यम् ॥

११२ स हि स्वार्थमजहन्नितरार्थः ॥

११३ अन्यस्य केवलमितरार्थत्वान्न पृथक् प्रामाण्यम् ॥

११४ शैवब्राह्मणेन गाथानाराशंस्या आरम्भाताः ॥

॥ उपनिषदधिकरणम् ॥

११५ उपनिषद्रहस्यपर्यायः ॥

११६ तत्पदं वैदिकतान्त्रिकस्मार्तरहस्यग्रन्थ-
साधारणम् ॥

११७ पठनपाठनस्य वेदशाखानुबद्धा उपनिषदो
वैदिक्यः ॥

११८ अन्याश्च याभ्यो निबन्धवाक्यानि साक्षाद्
गृहीतानि बादरायणेन ॥

११९ ताः किल खिलवेदशाखानुबद्धाः ॥

१२० परिशिष्टास्तान्त्रिकस्मार्तरहस्यग्रन्थान्यतरतां
भजन्ते ॥

१२१ वैदिक्यो वेदशाखानुबद्धलोकेतरेति चेन्न
गतिभेदात् ॥

१२२ उक्तिस्तु प्ररोचनार्था ॥

॥ स्मृत्यधिकरणम् ॥

१२३ स्मृतिर्लिङ्गं दर्शनस्य स्मरणं वेदार्थानुवाद-
कत्वसम्भवात् ॥

१२४ दोषसम्भवना प्रत्यक्षदर्शनविरोधश्च तदनुमापकत्व प्रतिबन्धायैकैकशः ॥

१२५ रागो द्वेषो वा दोषः ॥

१२६ दृष्टहेतुक स्मार्तधर्माणां समुच्चारमात्रत्वम् ॥

१२७ वैदिको धर्मोऽन्यः सनातनः ॥

१२८ सङ्ग्रथनिबन्धनाद्वसमयाचाराणां ग्राह्यत्वं न प्रामाण्यात् ॥

१२९ उक्तोत्तरापोह्या आनिसाः खलु ते ॥

१३० मन्वादिमहापुराणोक्तत्वादास्तिकेषु मन्वाद्युक्तं प्रामाण्यमिति चेत् कल्पितो हेतुः ॥

१३१ मन्वत्रिकात्यायनस्य च देवल नारद बृहस्पति-यमप्रजापति वसिष्ठ पराशराणां निरपेक्ष-दर्शनशालिनां परदर्शनसापेक्षं च कृतत्व-मस्मादुदेयम् ॥

१३२ अस्ति भाषाभेदश्च महान् ॥

१३३ एतेनादेशवतो याज्ञवल्क्यस्य स्मृतिकारत्वं आख्यातम्

૧૩૪ અઙ્ગિરોદક્ષસંવર્તાદીનાં મનુપલબ્ધ-
દર્શિતાનામપિ મન્વાદિવત્ પ્રાચાં સ્મૃતિ-
કારત્વં ચ મહતામ્ ॥

૧૩૫ ઋગ્વેદસ્ય પ્રાચા દર્શિતવતો મનુધર્મસંહિતા-
કારતમ્ ॥

૧૩૬ વિષ્ણુપ્રભૃતિધર્મસંહિતાકારઃ સાનિરપેક્ષા
વેદસંહિતા સ્યાન્ન સ્મૃતિઃ તદ્વિજ્ઞાનસ્ય નિઃસં-
શયનિષ્કરણાનુગૃહીતત્વાત્ ॥

૧૩૭ તસ્માન્મન્વાદિનામાઙ્કિતાઃ સ્મૃતયો ન
તત્કૃતયઃ ॥

૧૩૮ અન્ય એવ તત્કર્તારોऽન્તર્હિતસ્વનામાનઃ ॥

૧૩૯ પ્રાચીનકરણોક્તાઃ પ્રરોચનાર્થા ॥
પ્રામાણ્યસત્તાધિકરણાત્ ॥

૧૪૦ જ્ઞાનસ્ય પ્રામાણ્યમપ્રામાણ્યં વા સ્વત એવેત્યેકે ॥

૧૪૧ અન્યેષાં ન સ્વતો દ્વયં પરસ્પરવિરોધિત્વાત્ ॥

૧૪૨ તથાવ્યક્તિભેદો જ્ઞાનસ્ય પ્રમાણત્વેऽપ્રમાણત્વે ચ
ऽકારણત્વાત્

૧૪૩ ભેદેવાવિભાજ્યં નિરૂપયિતુમશક્યમનપેક્ષત્વાત્

१४४ परतश्चेन्नद्वयं ज्ञानस्य निःस्वभावप्रसङ्गा—
दितिचेत् ।

१४५ कारणगुणावधारणात् प्रामाण्यम् ।

१४६ कारणदोषावधारणादप्रामाण्यम् ।

१४७ इतरेषां ज्ञानस्य स्वतः प्रामाण्यमन्यथा
अनवस्थाप्रसङ्गात् ।

१४८ अप्रामाण्यं कारणदोषावधारणात् । [illegible]

१४९ परेषां सर्वं च ज्ञानं प्रमाणं प्रमाणस्य ज्ञानपर्यायत्वा—

१५० बलवताबलहीनस्य बाधः ।

१५१ बाधितं मिथ्याज्ञानसंज्ञां मिथ्याप्रमाणसंज्ञां
भजते ।

१५२ अन्यत् प्रमाणत्वं मिथ्याप्रमाणत्वात् ।

१५३ आग्रहणं पूर्वम् ।

१५४ यावदग्रहणमाधिक्यग्रहणं वा परम् ॥

१५५ विपरीतग्रहणं वा

~~१५६~~

॥ अपरोक्षप्रामाण्याधिकरणम् ॥

१५६ निर्दुष्टसर्वशक्तितत्त्वसिद्धिकरणानुगृही-
तत्वादपरोक्षाणां दर्शितानामितरेभ्यः प्रबल-
प्रामाण्यम् ॥

१५७ तेषां तु परस्परं तुल्यबलत्वम् ॥

१५८ शब्दस्य ज्ञानानुवादकत्वान्नामूलकत्वम् ॥

१५९ दोषाभावेन चोदनानां भूतभव्यात्मनां
प्रामाण्यं न दोषाप्रतिपा[illegible]नात् ॥

१६० पौरुषेयत्वप्रसङ्ग इति चेत् विकारनित्यत्व-
प्रसङ्गोऽन्यथा ॥

१६१ शब्दस्य नित्यत्वान्नेति चेत् लौकिकवाक्ये-
ष्वप्येष न्यायः ॥

१६२ एतावान्विशेषप्रसङ्ग इति चेत् ॥

१६३ अपरोक्षप्रमितस्य ज्ञापको वैदिकः शब्दः ॥

१६४ प्रत्यक्षादिप्रमितस्य लौकिकः

१६५ अपरोक्षस्य नित्यमदुष्टत्वान्नित्यप्रामाण्य
शब्दे ॥

१५५

१५५ सैवं पञ्चपञ्चाशदुत्तरेण शतेन सूत्राणां
लघुप्रमाणचर्चा भवति ।

इति श्री- वादिकुञ्जरगणपतेः कृतिः
लघुप्रमाणचर्चा समाप्ता

श्रीवासिष्ठ गणपति महामुनि प्रणीतः

॥ प्रामाण्यचर्चा ॥

२ वेदापौरुषेयत्वखण्डनम्.

इन्द्रं सोममग्निं विश्वांश्च देवान्नमस्कृत्य प्रमाणभूतं ऋग्वेदं देवताक्रमेण विभज्य आख्यास्यामः ॥ ऋच्य इति वेदः ऋग्वेदः ॥ यच्च "अग्निमीळे पुरोहितं" इत्यादिः "यथा वः सुसहासति" इत्यन्ताः ॥

कथमृचः प्रामाण्यम् ॥ अत्रैके आहुः ॥ शब्दो नित्यः ॥ तेषां नित्यानां शब्दानामर्थसम्बन्धश्च नित्यः ॥ तस्माच्छब्दा अर्थबोधकाः ॥ अत एव ज्ञातसम्बन्धस्य श्रोतुः किमपि ज्ञानमुत्पादयेयुः ॥ ज्ञानस्य च स्वत एव प्रामाण्यम् ॥ कारणदोषावधारणं तदपवादः ॥ अपौरुषेयेषु पुरुषबुद्धिदोषासम्भवात् तज्जन्यस्य ज्ञानस्य प्रामाण्यमपोदितं न भवितुं शक्यम् ॥ वेदास्त्वपौरुषेयाः कर्त्रनुपलब्धेरिति ॥ तस्माद् वैदिकवाक्यजन्यस्य प्रामाण्यं निरपवादम् ॥ तत्र हि नास्ति कारणदोषावधारणस्यावकाश इति ॥ ननु ऋग्वेदः पौरुषेय एव भवितुमर्हति शाकलक-

~~[illegible]~~ समाख्यालिङ्गादिति चेत् ॥ न ॥ प्रवचनादेव
सा समाख्या । नकर्तृत्वात् ॥ प्रवचनं च विशिष्ट-
मध्यापनं अनन्यसाधारणमध्ययनं वा ॥

+ अत्र विचार्यते — अस्तु शब्दो नित्यः ॥ अस्तु
तस्यार्थसम्बन्धो नित्यः । अस्तु तस्मादर्थबोधकः ॥
अस्तु तज्जन्यं ज्ञानं प्रमाणम् ॥ यावत्कारणदोषानव-
धारणम् न वेदा अपौरुषेयाः इत्ययं तु केवलः
प्रौढिवादः ~~कुत्र~~ उच्यते प्रकृतं तु ऋग्वेदमधिकृत्य
तस्य शाकलकसमाख्या प्रवचनादिति ॥ सा प्रवचनाद्वा
भवतु । पृथक् पृथगुपलभ्यमानानां मन्त्रभागानां-
एकसंहितारूपेण करणाद्वा भवतु ॥ तत्र नास्माक-
माग्रहः । प्राचीनऋषिच्छन्दोदेवतानुक्रमणिकाद्वारा
उपलभ्यान्ते ऋषयो मधुच्छन्दः प्रभृतयस्तु शाकलवत्
न परिहर्तुं शक्याः ॥ "यस्य वाक्यं स ऋषिः । या तेनो-
च्यते सा देवतेति ह्यभियुक्ता आहुः ॥
अग्निमीळे पुरोहितमित्यादिकाः ऋचः मधुच्छन्दः प्रभृ-
तीनाम् ऋषीणां वाक्यानीत्युक्तं भवति ॥
अर्थप्रकाशनाय कानिचित्पदानि संयोज्यन्ते —

यो यद्वाक्यमुच्चारयति स तस्य कर्तेत्यत ॥

"यस्य वाक्यं स ऋषिः" इति लक्षणं ऋषिमन्त्रयोः
ईदृशमेव सम्बन्धमपेक्षते ॥ तदनुवादमात्रपरं चेत्
सर्वोऽप्यध्येता सर्वस्य मन्त्रस्य प्रसज्येत ॥
विशिष्टमध्यापनमनन्यसाधारणमध्ययनं वा
यस्य वाक्यमित्यनेन प्रतीतं न भवति ॥ प्रसिद्धस्य
किञ्चेत वेदे शब्दानुशासने काव्येषु च मन्त्राणां कर्तारः
सन्तीति ॥ नमो मन्त्रकृद्भ्य इति ब्राह्मणम् ॥
"सुकर्मपापमन्त्रपुण्येषु कृञः" इति मन्त्रकृत्पद-
व्युत्पादनेन पाणिनिः ॥
"अप्यग्रणीर्मन्त्रकृतामृषीणां कुशाग्रबुद्धे कुशली गुरुस्ते"
इति रघुवंशे कालिदासः ॥ सिद्धमेवं मधुच्छन्दः-
प्रभृतीनामृग्वेदकर्तृत्वम् ॥ तस्मान्नास्ति कर्तृत्वानुप-
लब्धिरिति हेतुर्मन्त्राणामपौरुषेयत्वं साधयितुम् ॥
ननु — मधुच्छन्दःप्रभृतयोऽपि प्रवचनादेव तत्तन्मन्त्र-
भागर्षयो भवन्तु । यस्य वाक्यं स ऋषिरिति लक्षणस्य
अर्थो लक्षणया वक्तव्यः ॥ नमो मन्त्रकृद्भ्य इति
ब्राह्मणस्थस्य मन्त्रकृत्पदस्य च ॥

મન્ત્રકૃત્પદમુત્પાદનસ્યઃ પાણિનિરન્યેચ મન્ત્ર-
કૃત્પદસ્ય પ્રયોક્તારો લક્ષણયૈવ સમર્થયિતવ્યાઃ ।
નિત્યાનાં વેદાનાં કરણં હિ નોપપદ્યતે । તસ્માન્નસિધ્યતિ
મધુચ્છન્દઃપ્રભૃતીનામૃગ્વેદકર્તૃત્વમિતિ ચેત્ ।
અયં વિચિત્રો વાદઃ ॥ ભવદ્ભિઃ કેવા વેદાનાં નિત્યત્વં
સાધયિતું કર્ત્રનુપલબ્ધિર્હેતુઃ ॥ ઉપલબ્ધાનાં કર્તૄણાં
ગૌણત્વં વક્તું વેદાનાં નિત્યત્વં પુનરાશ્રીયતે ॥
મન્ત્રનિત્યત્વાયત્તમૃષીણાં મન્ત્રકૃત્ત્વસ્ય ગૌણત્વં
તદાયત્તા કર્ત્રનુપલબ્ધિઃ કર્ત્રનુપલબ્ધ્યાયત્તં
મન્ત્રનિત્યત્વમિતિ અયમતિસુન્દરશ્ચક્રકદોષઃ ।
ઋષીણાં મન્ત્રપ્રવચનકર્તૃત્વાદેવ તત્તન્મન્ત્રાર્ષિત્વં
પ્રસિદ્ધેરેવ ભવતુ ન નિત્યત્વાદ્યાત્ તેન ન ચક્રક-
દોષ ઇતિ ચેત્ ॥ સૈવ નાસ્તિ । ક્વચિદપિ મધુચ્છન્દઃ
પ્રભૃતીનાં મન્ત્રપાઠકનામ ન પ્રસિદ્ધમ્ ॥
નનુ અન્યા પ્રસિદ્ધિરસ્તિ ॥ ઋષયો મન્ત્રદ્રષ્ટાર ઇતિ ।
સૈવ મુખ્યાર્થસંવાદિની ભવતુ ॥ મન્ત્રકૃત ઇતિ
પ્રસિદ્ધિસ્તુ ભાક્તા ભવતીતિ ચેત્ — અત્રાધિકમુચ્યતે
ભવદ્ભિઃ ॥ પ્રવચનાદ્ દ્રષ્ટારશ્ચ ઇતિ ભવતાં વાદઃ ।

भवाद्भिः प्रदर्शिता प्रसिद्धिस्तु दर्शनादृष्यारस्या
इति वदति ॥ कथं सा भवतां मुख्यार्थसंवादिनी भवेत्
विशिष्टस्याध्यापनस्यानन्यसाधारणस्य अध्य-
यनस्य वा नास्ति हि दर्शनसंज्ञा ॥
ननु – मन्त्रविषये दर्शनवादमेव स्वीकुर्मः, न प्रवचन-
वादम् ॥ ऋषिभिरग्निमीळे इत्यादिका मन्त्रा दृष्टा
इति वदामः । सत एव मन्त्रान् पश्यन्तो मन्त्रद्रष्टार
उच्येरन् ॥ न मन्त्राणां कर्तारः ॥ यः सन्तमेव सूर्यं
पश्यति स एव सूर्यस्य द्रष्टोच्यते ॥ न सूर्यस्य कर्ता ॥
तस्मान्न सिध्यति ऋषीणां वेदकर्तृत्वमिति चेत् ॥
किमाभ्यन्तरेण चक्षुषा पश्यति मन्त्रानृषिः ॥ उताहो
बाह्येन ॥ शब्दस्य चक्षुरिन्द्रियागोचरत्वात् द्वितीय-
स्यानवकाशः ॥ आद्ये यद्यपि पश्यन्ती वागवभासेत ॥
तथापि द्रष्टा दृष्टमर्थं द्योतयन्ती द्रष्टुरतिसूक्ष्मा
भावैव सा ॥ अतिसूक्ष्मभावाच्च पदबन्धात्मिका
तादृशव्यक्ताभावात् तद्वतः कृतितो नातिरिच्यते ॥
तस्मान्न मन्त्रद्रष्टृत्वं न मन्त्रकर्तृत्वं प्रतिहन्ति ॥
प्रतिपाद्यगौरवं पुरस्कृत्य कृतीनां दर्शनत्वव्यवहारः स्यात्

यथा काणादं दर्शनं पातञ्जलं दर्शनमित्यादि॥
अर्थापेक्षया द्रष्टृत्वं पदबन्धापेक्षया कर्तृत्वमिति विना
न विरोधः॥

ननु — मन्त्रद्रष्टार इत्यत्र दर्शनं लक्षणया श्रवणं
वदामः॥ सततमेव मन्त्रस्य घण्टानादादितुल्य-
नादवत् अन्तः श्रोता योगी मन्त्रद्रष्टोच्यते॥
न नूतनतया कर्तेति चेत्॥ यदि मन्त्रश्रोतार इत्यपि
प्रसिद्धमभिधानमृषीणां स्यात्॥ तदा तदनुसारेण
मन्त्रद्रष्टार इति पदं लाक्षणिकं कल्पनीयं स्यात्॥
न त्वस्ति तत्॥ यदि श्रवणादेव मन्त्रानृषयो लेभिरे
तर्हि मुख्यार्थसंवादिनी मन्त्रश्रोतार इति प्रसिद्धिः
कुतो न स्यात्॥ अस्ति हि द्विविधा प्रसिद्धिः॥ मन्त्रकृतः
इत्येका॥ मन्त्रद्रष्टार इत्यन्या॥ तयोरेव सामरस्यं
कल्पयितव्यम्॥ नोभयत्यागेन मुख्यार्थसंवादि-
त्वाय पदान्तरमप्रसिद्धमन्वेषणीयम्॥

ननु — मास्तु मन्त्रश्रोतार इति प्रसिद्धिः॥ अस्ति
वेदानां श्रुतयः इत्यभिधानम्॥ तेन ऋषीणां श्रवणानि
मन्त्रा इति सुलभं शक्यते वक्तुमिति चेत्—

સાક્ષાદ્

નાસ્તિ વેદાનાં શ્રુતય ઇત્યભિધાનમ્ ॥ વૈદિકવાક્યેષુ ભવ્યસ્ય ધર્મસ્ય ભૂતસ્ય વસ્તુનો વા પ્રમિતયે સાધન-ભૂતસ્યાર્થસ્ય ઝટિતિ સમર્પકો યઃ શબ્દઃ તસ્ય શ્રવણં શ્રુતિરિતિ શાસ્ત્રપરિભાષા ॥ અત્ર શ્રોતા સર્વોઽપિ પ્રમાતા ॥ એતાદૃશાનિ શ્રવણાનિ વિધિવાક્યે એવ ભવન્તિ નાન્યત્ર વેદભાગે, તસ્માદ્વૈદિકસ્યૈવ શ્રુતયઃ ન વેદાઃ સાક્ષાત્ ॥ અત્રેદં ભવદુપજીવ્યં પૂર્વતન્ત્રસૂત્રં ભવતિ ॥
"શ્રુતિલિઙ્ગવાક્યપ્રકરણસ્થાનસમાખ્યાનાં સમવાયે પારદૌર્બલ્યમર્થવિપ્રકર્ષાત્" ઇતિ ॥

યદિ સાક્ષાદ્ વેદપર્યાયઃ શ્રુતિશબ્દો લિઙ્ગાદિભ્યઃ તં કથં પૃથક્કર્તું શક્નોત્યાચાર્યઃ ॥ શ્રુતિપ્રાધાન્યાદ્ વેદસ્ય સર્વસ્ય શ્રુતિત્વેન અવહારોઽવાચ્યમ્ ॥

અપિ ચ શ્રવણવાદે સ્વીકૃતે ભવતાં પ્રવચનવાદઃ સર્વથા કીર્તિશેષઃ સ્યાત્ ॥ સર્વવેદવિભાગવિષયો હિ શ્રવણ-વાદઃ ॥ ન મન્ત્રમાત્રવિષયઃ ॥

નનુ- માસ્તુ કર્ત્રનુપલબ્ધિર્હેતુઃ "વાચા વિરૂપ નિત્યયા" ઇતિ મન્ત્રલિઙ્ગપ્રામાણ્યાદ્ વેદાનાં નિત્યત્વં બ્રૂમઃ ॥ સાધ્ય-મેવ હ્યસ્માકં પુરસ્યાંદ ॥ તચ્ચ વેદાનાં નિત્યત્વમ્ ॥

સઃ કશ્ચિદ્ધા ભવતુ હેતુઃ॥ એવં વેદાનાં નિત્યત્વે સિદ્ધે મન્ત્રકર્તૃઋષીણાં ગૌણં કલ્પયિતું શક્યં સ્યાદિત્યેતત્॥ એતેનાપિ હેતુના ન ભવતાં કાર્યં સિધ્યેત્॥ નિત્યત્વાદ્વેદઃ પ્રમાણમિતિ ભવતાં વાદઃ॥ સમ્પ્રતિ ભણામિ તત્ર વેદસ્ય નિત્યત્વં વેદપ્રામાણ્યાદિતિ॥ અયમતિસુન્દરઃ ઇતરેતરાશ્રયો દોષઃ॥

અપિ ચ મન્ત્રવર્ણોક્તં વાચો નિત્યત્વં સામાન્યતઃ શબ્દનિત્યત્વપરતયા ચ નેતું શક્યમ્॥ આચાર્યો જૈમિનિરપ્યત્ર વાચો નિત્યત્વં સામાન્યતઃ શબ્દનિત્યત્વમેવ મન્યતે॥ ન વૈદિકવાક્યબન્ધનિત્યત્વમ્॥ યદયં સામાન્યતઃ શબ્દનિત્યત્વસ્યૈવ સાધનાર્થં લિઙ્ગાન્યેતાનીમં હેતું સમુચ્ચિનોતિ॥ એતદેવ યુક્તમ્॥ મન્ત્રાર્થશ્ચાસ્મિન્નેવ પક્ષે નિર્વિરોધો ભવતિ॥

"તસ્મૈ નૂનમભિદ્યવે વાચા વિરૂપ નિત્યયા॥ વૃષ્ણે ચોદસ્વ સુષ્ટુતિમ્॥" ઇતિ પૂર્ણો મન્ત્રઃ॥ અસ્યાઙ્ગિરસો વિરૂપ ઋષિઃ। અત્રર્ષિર્વિરૂપાત્માનં સમ્બોધ્ય અગ્નિસ્તુતૌ પ્રેરયતિ॥ યદ્યત્ર નિત્યત્વં વાક્યબન્ધપરં સ્યાત્। તદાત્રર્ષેરાત્મનઃ સમ્બોધનમગ્નિસ્તુતિપ્રેરણં ચ ન સઙ્ગચ્છેતે॥ ભવન્મતે ઋષિમન્ત્રયોરર્થનિબદ્ધે સમ્બન્ધાભાવાત્॥

परसम्बोधनमेवेदं नात्मसम्बोधनमिदमिति चेत्॥ नित्ये
कथमनित्यस्य सम्बोधनम्॥ विरूप नित्ययेत्येकं पदं कुर्म
इति चेत् तदशक्यं पृथक्पदपाठात्। विरूपशब्दस्य
रूपाभाववान् वायुराकाशो वा भवतु इति चेत्॥ न स-
प्रकृतास्मिन् स्तुतिप्रकरणेऽन्वितो भवति॥ विशिष्टरूपो
मनुष्यो भवति इति चेत्॥ साधारणरूपः किं पापं कृतवान्॥
एतादृशानि क्षीणानामात्मसम्बोधनानि मन्त्रेष्वन्य-
त्रापि दृश्यन्ते॥ "नोधः सुवृक्तिं प्रभरा मरुद्भ्यः" इति
नोधस आर्षे॥ "इन्द्रं समर्ये महया वसिष्ठ" इति वसिष्ठस्य॥
"एवा नूनमुपस्तुहि वैय्यश्व दशमं नवम्॥" इति वैय्यश्वस्य
विश्वमनसः॥ "विभूतरातिं० अस्मेधस्य सोम्यस्य सोभरे०-
पूर्व्यम्" इति सोभरेः॥ ईदृशमेवात्मसम्बोधनं वक्तुं युक्त-
मत्वैवाथा विरूप नित्ययेति अत्रापि॥
अथवा वाक्यपरत्वे वा नित्ययेति विशेषणं निःसंशयं
भवदभिमतमर्थं बोधयितुं न पारयति सन्ततयेत्यपि
तदर्थस्य सुवचत्वात्। नित्याग्निहोत्रादिषु पदेष्वेवमेव
नित्यशब्दो हि सन्ततार्थवाची॥
ननु – असत्यन्यप्रमाणं वेदस्य नित्यत्वं साधयितुम्॥

तच्च स्मृतिवचनम् "अनादिनिधना नित्या वागुत्सृष्टा स्वयम्भुवा" इति। किमेतद्वचनं पौरुषेयमाहोस्विद् अपौरुषेयम्॥ पौरुषेयमेव, तथापि वेदमूलकत्वात् प्रमाणमिति चेत् प्रागुक्तः इतरेतराश्रयो दुर्वारः॥ अपि चात्रापि वाक्यच्छलः सामान्यतः शब्दपरतया च आख्यातुं शक्यः। दृश्यन्ते च मन्त्राणां कार्यत्वे मान्त्र-वर्णिकानि वचनानि॥ तेषु कानिचिदुदाह्रियन्ते॥

"एतेनाग्ने ब्रह्मणा वावृधस्व" इति हिरण्यस्तूपस्यार्षे॥

"शंसेदुक्थं० सुदराधसे" इति वसिष्ठस्योद्देशेन॥

"उरुव्यचसे महिने सुवृक्तिमिन्द्राय ब्रह्म जनयन्त विप्राः॥" इति साधारणतया॥ पूर्वत्रोपमानभूता नरो नेतारो यथा छन्दोभाष्यम्॥ अत्र विप्रा मेधाविनः एकत्र नेतारः प्रकरणादृषय इतरे॥ अन्यत्र विप्राः सामान्यतः ब्राह्मणाः। "उत ब्रह्मण्या वयं० जीवसे॥" इति वसिष्ठस्यार्षे॰ अत्र ब्रह्मण्या ब्रह्माणि यथा छन्दोभाष्यम्॥

"अस्मा इदु स्तोमं सं हिनोमि० सिनाय॥" इति नोधस आर्षे॥

"इन्द्र ब्रह्म क्रियमाणा जुषस्व या ते शविष्ठ नव्या अकर्म वस्त्रेव० अतक्षाम्" इति गौरिवीतेः॥

અનિત્યજનનવત્પુરુષનામયોગાત્ તત્સમ્બદ્ધકથા-
યોગાચ્ચ વેદાનાં તત્પુરુષજનનતઃ પ્રાગભાવઃ ॥
કુત્સકક્ષીવદ્દિવોદાસદધીચિસુશ્રવોભુજ્યુવૃષણશ્વ-
શ્વેત્ર પ્રભૃતીનિ પરઃશતાનિ ભૂલોકે જનનવતાં મનુ-
ષ્યાણાં નામાનિ મન્ત્રકાણ્ડે દૃશ્યન્તે। તત્સમ્બદ્ધાશ્ચ
કથાઃ॥ ભૃગુવારુણિ જાનશ્રુતિ સત્યકામોપકૌસલા-
શ્વપતિ શ્વેતકેતુ યાજ્ઞવલ્ક્ય જનક પ્રભૃતીનિ
પરઃશતાનિ ભૂલોકે જનનવતાં મનુષ્યાણાં નામાનિ
બ્રાહ્મણેષુ દૃશ્યન્તે॥ તત્સમ્બદ્ધાશ્ચ કથાઃ॥
ભવતાં નેતા શબરસ્વામી, બ્રાહ્મણસ્થ બબરઃ
~~પ્રાહ્મણિઃ~~ પ્રાવાહણિઃ એતેષાં નામાનિ ક્રિયયા વિદ્યયા
વાયુપરતયા વ્યાખ્યાય પૂર્વપક્ષોદાહૃતં કુસુરુ-
વિન્દ ઔદ્દાલકિરિત્યન્યન્નામાન્યપરિહરન્નેવ
વેદવાક્યાનાં સર્વેષામપ્યનિત્યાર્થસંયોગઃ પરિહૃતઃ
દૃષ્ટઃ કૃતાર્થમાત્માનં મન્યમાનો નિશ્ચલકામ॥
તચ્ચ બબરસ્ય પ્રાવાહણેશ્ચાખ્યાને પ્રવાહણસ્ય
પુ~~ત્ર~~સ્યાપ્રસિદ્ધત્વાન્ન પ્રવાહણસ્યાપત્યં
પ્રાવાહણિરિતિ વદતિ॥ પ્રતિવાદિનો નેત્રયોઃ

धूलिप्रक्षेपमेतत् ॥ आसीत् प्रवाहणः प्रसिद्धो जीवलस्य
पुत्रः पञ्चालानां राजा ॥ तं प्रवाहणं जैवलिं वदन्ति ॥
अयमेव राजर्षिरुद्दालकाय पञ्चाग्नि विद्यां
कथितवान् ॥ या क्षत्रियेष्वेव प्राग् बभूव न ब्राह्मणेषु ।
अयमेव राजर्षिः शिलकाय शालावत्याय चैकिता-
यनाय दाल्भ्यायच्चाकारोद्गीथ विद्यामुपदिष्टवान् ॥
एतदुभयं च दृश्यते छन्दोगानामुपनिषदि ॥
सायनाचार्यस्तु स्वकीयस्य ऋग्वेद भाष्यस्योप-
क्रमे यथा मीमांसक सम्प्रदाय मनित्यार्थयोगो
वेदेऽनुनास्तीति प्रतिज्ञाय शबरस्वामिवत् पिता-
पुत्राभ्यां प्रवाहणबबराभ्यां वायुसायुज्यं दत्वा
मन्त्राख्यानसमये तां प्रतिज्ञां विस्मृत्य स पूर्णवेद-
अनित्यार्थैः पूरितवान् ॥ अथवा स किं करोतु
साम्प्रदायिको विद्वान् ॥ तेनाचार्यः शबरस्वामी
नोल्लङ्घयितव्यः ॥ मन्त्राश्च यथाशक्ति गति
आख्यातव्याः ॥

॥વ્યક્ત્યાવૃત્તિવાદખણ્ડનમ્ ॥

અપર આહુ — વેદોક્તાનાં વ્યક્તીનાં નાનિત્યત્વમ્। પ્રતિકલ્પં
તદાવૃત્તિર્ભવતીતિ હેતોરિતિ ॥ અત્ર કિં પ્રમાણમ્ ? ॥
"સૂર્યાચન્દ્રમસૌ· સ્તઃ" ઇતિ મન્ત્રવર્ણઃ પ્રમાણમિતિચેત્ ॥
અત્ર કિમસ્તિ વેદોક્તાનાં વ્યક્તીનાં સમર્થકં કિમપિ પદમ્ ॥
આજહલ્લક્ષણયા વદામઃ ઇતિચેત્ ॥ વિશ્વસમક્ષં યાવદનુક્તં
તાવદેવ તદ્વચનં લક્ષયિતું પ્રભવેત્ ॥ તતસ્તાઃ કાશ્ચન વ્યક્તી-
રપિ ॥ યદિ વ્યક્તીસ્ત્વ લક્ષયેત્ તર્હિ સર્વા અપી તાપત્તિઃ ॥
ઇમા એવ લક્ષયેન્નેમા ઇતિ વિનિગમકવિરહાત્ ॥
તર્હિ દેવાનામસઙ્ગ્રહ ઇતિચેત્ । ન । સમષ્ટિકોટાવેવ હિતે
વ્યષ્ટિકોટાવપિ ભૌતિકાધ્યાત્મિકવૈભવશાલિત્વાત્ ॥
આધિકારિકવ્યક્તીર્લક્ષયેત્ નતામિન્ના ઇતિ વ્યવસ્થાં
કુર્મઃ ઇતિચેત્ ॥ યથા સ્વમતં ભવતાં વ્યવસ્થા સ્યાત્ ॥
વયં તુ પૃચ્છામોઽર્થમેવ પ્રમાણવાક્યસ્ય ॥ અપિચ આધિ-
ભૂતમધ્યાત્મં ચાન્યતરત્ત્વા કસ્યચિત્ પ્રપઞ્ચાંશસ્ય
યો નેતા સ એવાધિકારિકો ભવતિ ॥ તેન મનુષ્યવ્યક્તીનાં
આધિકારકત્વમેવ પ્રથમમનુપપન્નમ્ ॥
અન્યે પ્રાહુઃ —, યથાઽર્થબોધકત્વં લૌકિકવૈદિકેષુ વાક્યેષુ)
(તુલ્યમ્

तथा विवक्षामूलकत्वमपि वाक्यस्य निसर्गो ह्येवम् ॥
विवक्षा च यत्किञ्चित्कर्तृनिष्ठा भवति ॥ तस्माद्वेदानाम्
सकर्तृकाः ॥ केन ? ईश्वरेणेति ब्रूमः ॥ तत्र मन्त्रकाण्डे
यस्य यस्य भागस्य येन आद्य उपलब्धा स तस्य ऋषिः
कथ्यते ॥ नित्यसिद्धस्यैव मन्त्रस्याद्योपलब्धिरन्तर्बहिर्वा
श्रवणात् एव साक्षात् न कर्तृत्वमुखम् ॥ ईश्वरप्रेरितस्य
उपलब्धिप्रकारोऽयम्, ईश्वर आत्मकृतं मन्त्रमन्तर्यामि-
स्वविभूतिद्वारा ऋषेरन्तःकरणे प्रेरयति ॥ स तत्र
पश्यन्ती वाग्रूपेण भासते । अत्र सूक्ष्मे शब्दे समवेतोऽर्थः
सूक्ष्मं भासते सा पश्यन्ती वाक् ॥ अनुभूतिश्च सर्वेषा-
मेवा ॥ यदस्माकं सर्वाण्याभ्यन्तराणि सविषयाणि
चिन्तनानि सूक्ष्मशब्दसमवेतान्येव भवन्ति ॥ शब्दं
विना न परोक्षस्य कस्यचिदर्थस्य भानमन्तर्बहिर्वा ॥
तदिदमेव ऋषीणां मन्त्रदर्शनमुच्यते ॥ तं च दृष्टं मन्त्रं
ऋषिर्वैखर्या बहिः प्रकाशयति ॥ तदिदमेव ऋषीणां
मन्त्रकरणमुच्यते ॥ आद्योच्चारणमेव करणमिति
उपचर्यत इत्युक्तं भवति ॥ एवमीश्वरवाक्यत्वात्स्वतः
प्रमाणम् ॥ अन्ये च वेदाः ॥ अन्ये च वेदाः ॥ ईश्वरवाक्यत्वात्

વેદેષુ કારણદોષોનાવધારયિતું શક્યઃ। જ્ઞાનસ્ય સ્વતઃ-
પ્રામાણ્યાનઙ્ગીકારેઽપિનાત્ર કિમપિ બાધકમ્ ॥ ઈશ્વર-
વાક્યત્વેન કારણગુણાવધારણસ્યાપિ શક્યત્વાત્ ॥
વેદાનાં પારમેશ્વરત્વેચ મન્ત્રબ્રાહ્મણે પ્રમાણે ભવતઃ ॥
"તસ્માદ્યજ્ઞાત્॰ અજાયત ઇતિ મન્ત્રઃ ॥ "અસ્યમહતો-
ભૂતસ્ય નિઃશ્વસિતં યદૃગ્વેદઃ॰ ઇતિ બ્રાહ્મણમ્ ॥
અનિત્યાર્થસંયોગો નાસ્માકં દોષઃ ॥ સર્વજ્ઞસ્યેશ્વરસ્ય
સર્વકાલવ્યાપિની ભારતીતિ મહ્દ્ભુતગુણઃ ॥ યાનિત્વયા
કાર્યત્વે પ્રદર્શિતાનિ વચનાનિ તેષ્વહમર્થ ઈશ્વરો
વક્તવ્યઃ ॥ "ઉરુવ્યચસે મહિને સુવૃક્તિમિન્દ્રાય
બ્રહ્મજનયન્ત વિપ્રાઃ" ઇત્યત્ર પરોક્ષરીત્યા વિપ્રાઃ ઇતિ
આત્માનમેવ સમ્બોધયતો વદતીતિ વક્તવ્યમ્ ॥
વિપ્રશબ્દસ્ય સામાન્યતો મેધાવિવાચકત્વાત્ ॥ તત્ર
બહુવચનમીશ્વરે નોપપદ્યતે ॥ મન્ત્રેષુ જીવાનાં સમ્બો-
ધનાનિ ઈશ્વરેણૈવ ક્રિયન્તે ઇત્યઙ્ગીકૃતે કો દોષઃ ॥
વિશેષતઃ સમ્બોધનં ચ તત્સ્યાત્સ્યાવિરોધિત્વાત્ ॥
સર્વજ્ઞસ્યેશ્વરસ્ય સર્વકાલવ્યાપિની ભારતી સુવ્યક્તમેવ ॥
શાસ્ત્રયોનિત્વાદિતિ શારીરક સૂત્રસ્ય ભાષ્યેન ચ

शङ्करभगवत्पादा इममेव पक्षमङ्गीचक्रुः॥ सायणा-
चार्यश्च प्रायो मीमांसकसिद्धान्तमनिराकुर्वन्नपि
मनुष्यनिर्मितत्वाभावेनैव वेदानामपौरुषेयत्वमिति
वदन्नेतं सिद्धान्तमङ्गीकरोत्येव सायणमतस्या-
प्ययमेव पक्ष उपादेय इति॥ अत्र विचार्यते य
पक्षोऽस्मिन् वैदिकवचनप्रामाण्यादेव वेदानां
पारमेश्वरत्वमङ्गीकर्तव्यम्॥ वैदिकवचनप्रामाण्यं च
वेदानां पारमेश्वरत्वादेव॥ अयमन्योऽन्याश्रयदोषः॥
नास्त्यन्योऽन्याश्रयः॥ न वेदप्रामाण्याद्वेदस्य
पारमेश्वरत्वं ब्रूमः॥ वेदप्रामाण्यं नाम ईश्वरवाक्य-
प्रामाण्यम्॥ आप्तवाक्यप्रामाण्याद्वेदस्य पारमे-
श्वरत्वम्॥ कोऽयमाप्तः॥ यो वेदानां कर्ता स एव
अत्राप्तः॥ कोऽनयोर्विशेषो वेदानां कर्तुरीश्वर-
स्य च॥ अविज्ञाततनामा पूर्वः केवलं ग्रन्थ-
कर्तृत्वलक्षणः॥ विज्ञाततनामा सर्वज्ञत्वादिमहा-
भाग्यवत्त्वेन ज्ञायमानः परः॥ वेदानाकर्णयन्तो
वयं कोऽस्य महतो ग्रन्थस्य कर्तेति प्रश्नं जिज्ञासा-
महे॥ तदस्माकमिदं प्रमाणमप्रमाणं वेति मीमांसैव
निर्णयति॥

ग्रन्थे यदा कर्तुर्नाम न ज्ञातं तदा तं कर्तारं निर्धारयामः ॥
तथा अस्माकं लक्ष्यं नामेश्वरस्य ॥ ग्रन्थान्तरेष्वप्येवमेव
ग्रन्थकारनाम्नो ग्रन्थे लिङ्गैरेव ग्रन्थकारं निर्धारयितुं
प्रभवति ॥ तद्विदमाप्तवाक्यप्रामाण्यम् ॥ साधारणोऽपि
मनुष्यो यथावदनुभूतार्थ आप्त उच्यते ॥ नेश्वरत्वं
तत्रापेक्षितम् ॥ तादृशादाप्तवाक्यप्रामाण्यादेव
उदाहृतयोर्मन्त्रब्राह्मणयोः प्रामाण्यम् ॥ अनन्तरं
सर्वस्य वेदस्य ईश्वरवाक्यत्वे निर्धारिते तस्य प्रामाण्यं
सुस्थिरं स्यात् ॥ अत्रेदमुदाहरणं भवति ॥ भारते वय-
मध्यायान्तेषु वैयासिक्यां संहितायामिति यदा
विलोकयामः तदा व्यास एवमुवाच ॥ ततो व्यास-
प्रोक्तमिदमिति धीं ~~सम्पद्यमाना दृश्यते~~ न नोत्पद्यते ॥
अपितु ग्रन्थकार एवमुक्तवान् अतो व्यासप्रोक्तमिद-
मिति धीः सम्पद्यमाना दृश्यते ॥ अनन्तरं व्यासप्रोक्ते
यावद्गौरवं तावत्तत्र जायेत ॥ तस्मान्नान्योऽन्याश्रयः ॥
सर्वथैवास्तु अन्योन्याश्रयः ॥ अन्यदस्ति कारणम् ॥
ईश्वरवाक्यस्यैव भवदुक्ताप्तवाक्यं न निरङ्कुशं
प्रामाण्यम् ॥ तस्मात् तदनुसारेण वेदानामीश्वरवाक्यत्व-
(सिद्धिः ॥

नान्विदं निरवद्यम् ॥ यथाप्तो वक्ता तस्य वाक्यं कुतः
प्रमाणं न स्यात् ॥ यो ग्रन्थस्य कर्ता स आत्मनः कर्तृ-
त्वस्य ज्ञानाय किमपि प्रमाणान्तरं नापेक्षते । तत्र तस्य
न कदाचिदपि प्रमादः सम्भवति ॥ तस्मात्सर्वोऽपि ग्रन्थ-
कारः आत्मनो ग्रन्थकर्तृत्वस्य ज्ञाने निरपेक्षो वक्तव्यः ॥
स्वग्रन्थकर्तृत्वस्य स्वानुभवगोचरत्वात् ॥ यदि स आत्मनो
नामोदाहरति कर्तृत्वेन ग्रन्थे तर्हि यथानुभूतार्थसंवादी
वक्तव्यः स्यात् ॥ तस्मात्तस्याप्तत्वं पुरस्कृत्यानुभूतार्था-
नुवादकत्वं सिध्यतीति चेत् ॥ आप्तोक्तेः कर्तरि भूतार्थक-
त्त्वप्रसक्तेः कृते सति आप्त इति रूपं भवति ॥ अयं च राद्धार्थो
विषयप्राप्तिपर्यन्तमेव धावति न तदनुवादित्वपर्यन्तम् । य
तादृशानामाप्तानां वाक्यानि सर्वाण्यपि नैव विश्वसनीयानि य
निश्चयवादित्वस्य च सम्भवात् ॥ प्रकृते न वयं मादृशानः
आप्तवाक्यस्य मूलं ज्ञानं भ्रमप्रमादपतितं वा दूषितं भवितुं
शक्यमिति ॥ इदमेव शङ्कामहे तद्वाक्यं यथानुभूतसंवादि
वा निश्चयावेति ॥ उभयस्यापि सम्भवात् । तद्यथानुभूत-
संवादित्वेऽपि निश्चेतुं वक्तुर्विश्वसनीयत्वमपेक्षितम् ॥
वक्तुर्विश्वसनीयत्वं निश्चेतुं वक्तुर्विशिष्टः परिचयोऽपेक्षितः ॥

अथ मोदशगुणपूर्णोऽपि मेलितं तस्मादविज्ञातनाम्नो ग्रन्थ-
कर्तुः वचनादेव ईदृशेषु सन्दर्भेषु न वयं किमपि निर्धारयितुं
शक्नुमः। न खलु केवलं रघुवंशादीनि कालिदासादिकवि-
कृतानीति निर्धारयितुम् उपक्रमः संस्यात्। विषमो दृष्टान्तः।
प्रमाणग्रन्थो वेदः। रघुवंशादयः केवलं साहित्यग्रन्थाः।
प्रमाणग्रन्थानां प्रामाण्यं न स्वायत्तम्। अपि तु ग्रन्थकारा-
दिविस्तदियज्ञानसापेक्षम्। साहित्यग्रन्थानां निरपेक्षं
प्रामाण्यमेव नास्ति प्रथमम्। यत्तु तत्र सहृदयैरर्थ्यमानं
रामणीयकं तच्च ग्रन्थस्य शब्दार्थायत्तमेव न ग्रन्थकार-
गुणायत्तम्। पूर्वदले कर्ता ग्रन्थस्य प्रामाण्याय कस्यचि-
दप्यहितमस्य नामकर्तृत्वेनोदाहरेदिति शङ्कितुं शक्यम्।
नोत्तरत्र। शङ्काहेतोरभावात्। कृतमनया चर्चया।
भवतो वादमूलमेव प्रथमम् असन्तां दुर्बलम्। वेदकर्तृ-
प्रत्यायकत्वेनोदाहृतयोर्मन्त्रब्राह्मणयोः साक्षात्
परमेश्वरं वेदकर्तृत्वेन समर्पयितुं नास्ति शक्तिः।
कः साक्षात् परमेश्वरः। यः परमेश्वरो नाम जगतामध्यक्षः स
साक्षात् परमेश्वरः। तद्भिन्नविभूत देवतापर्युदासाय
अन्तर्यामिपर्युदासाय च साक्षादित्युक्तिः।

मन्त्रे विराट्पुरुषस्य प्रस्तुतत्वात् सर्वेषां च देहिनां
तदेकदेशत्वेन सर्वदेहिकृतो ग्रन्थसमुदायस्तत्कृत इति
धियादि ऋगादीनां तत्कृतत्वोक्तिः सङ्गच्छते ॥
उत्तरस्यामृचि च "तस्माद्श्वा अजायन्त ये के चोभयादतः
~~इति~~ अजावयः इति सूर्यकिरणबीजकपृथिवीप्रकृतिक—
मात्रस्योत्पादनं च विराट्पुरुषस्य पक्ष एव सङ्गच्छते ॥
न साक्षात्परमेश्वरस्य पक्षे ॥ ननु को भेदो विराट्पुरुषस्य
साक्षात्परमेश्वरस्य च ॥ उच्यते ॥ सर्वब्रह्माण्डैः सह
विशिष्टस्येश्वरस्य विवक्षायां लोके विराट्पुरुष इति
निर्देशः "सहस्रशीर्षा पुरुषः — दशाङ्गुलम्" इत्यादौ
वर्ण्यमान उदाहरणम् ॥ सर्वब्रह्माण्डाधिकारिदेवतात्म-
स्वरूपेश्वरस्याभिमानविवक्षायां साक्षात्परमेश्वर-
इति निर्देशः ॥ "यो अस्याध्यक्षः — न वेद" इत्यादौ वर्ण्य-
मानः उदाहरणम् ॥ तस्मात् साक्षाज्जगताम् अध्यक्षो
वेदान्कृतवान् इत्यत्र वेदे प्रमाणं न भवति ॥
विशिष्टस्य प्रकरणे हि तत् ॥ ब्राह्मणं च स्पष्टं विशिष्टस्य
प्रकरणमवगमयते ॥ तस्य पूर्णं वाक्यमिदं हि भवति-
अस्य महतो भूतस्य निःश्वसितं० सर्वाणि भूतान्यस्यैव ~~[illegible]~~ इत्यादि

निःश्वसितानि" इति ॥

किमुत्स्विदत्र वाङ्मये ॥ प्रायः सर्वमीश्वरकार्यत्वेनोक्तम् ॥
किमिदं ब्राह्मणवचनं पुराणेतिहासविद्याश्लोकसूत्र —
व्याख्यानानुव्याख्यानवैलक्षण्येन वेदानां साक्षादीश्वर —
रचितत्वं निर्धारयितुं प्रभवेत् ॥ सन्ति च बहूनि बाधकानि
वेदाः परमेश्वरस्य साक्षात् कृतय इत्यत्र ॥

१ औपम्यानुपपत्तिः — शंसेदुक्थं सुदानव उत द्युक्षं
यथा नरः । चकृमा सत्यराधसे" इति वसिष्ठस्यार्षेः प्रागुदाहृतो
मन्त्रः ॥ अत्रायमर्थः ईश्वरेण यद्यान्वितः स्यात् तर्हि
"यथा नरः" इति औपम्यं न सङ्गच्छेत ॥ यथा नर उक्थं
कुर्वन्ति तथा वयमपीति ॥ नर इति नॄणां विशिष्ट —
पुरुषाणां नाम यथाच्छन्दोभाष्यम् ॥

"अहं प्रत्नेन मन्मना गिरः शुम्भामि कण्ववत्" इति
वत्सस्यार्षेश्चात्रोदाहर्तव्यम् ॥

२ — प्रयोजनसङ्कीर्तनानुपपत्तिः ॥ — उत ब्रह्मण्या वयं
तुभ्यं प्रवृद्ध वज्रिवः ॥ विप्रा अतक्ष्म जीवसे ॥ इति वत्सस्यार्षेः
प्रागुदाहृतो मन्त्रः ॥ अत्रायमर्थः ईश्वरेण यद्यान्वितः स्यात्
जीवसे इति प्रयोजनसङ्कीर्तनं न सङ्गच्छेत यतः चिरंजीवनाय —

ब्रह्मात्मिके सतीश्वरः॥

२-४ — नव्यतानुपपत्तिः — कामानुपपत्तिश्च॥

“इन्द्र ब्रह्म क्रियमाणा जुषस्व या ते शविष्ठ नव्या अकर्म।

~~वस्त्रेव भद्रा~~ वस्त्रेव भद्रा सुकृता वसूयू

रथं न धीरः स्वपा अतक्षम्” इति गौरिवीतेरार्षः प्रागुद्-

धृतो मन्त्रः॥ अत्राहमर्थः ईश्वरेण यद्यन्वितः स्यात्

तर्हि नव्या इति स्वात्मविशेषणं न सङ्गच्छेत। न च

उत्तरार्धे वसूयुरिति। वसूयुर्वसुकामो यथा-

च्छन्दोभाषम्। ईश्वरो हि पुराणेभ्यः पुराणः

आप्तसर्वकामश्च॥

५- अहमर्थानन्वयः — सर्वत्राऽहमर्थश्च नान्वेति

ईश्वरेण मन्त्रवर्णस्थासु स्तुतिषु। यदीश्वर एव वेदानां

कर्ता तर्हि सर्वत्र स्तुतिषु अहमर्थेन मन्त्रवर्णस्थेन

ईश्वरान्वितेनैव भवितव्यम्। न स सर्वत्र

ऋषिभिरेवान्वितो दृश्यते॥ इमानि स्पष्टानि

कानिचिदुदाहरणानि॥ “तं त्वा वयं पतिमग्ने रयीणां

प्रशंसामो मतिभिर्गोतमासः॥” इति गौतमस्य

नोधस आर्षे॥ अत्र वयं गोतमाः प्रशंसाम इति

આર્ષત્વાનુકૂલઃ પારમેશ્વરત્વપ્રતિકૂલોઽર્થઃ ॥

" અભિ ત્વા ગોતમા ગિરા જાતવેદો વિચર્ષણે ॥ દ્યુમ્નૈરભિ પ્રણોનુમઃ " ઇતિ રાહૂગણસ્ય ગોતમસ્યાર્ષે ॥ અત્ર વયં ગોતમાઃ અગ્નિં પ્રણોનુમઃ ઇતિ, આર્ષત્વાનુકૂલઃ ઈશ્વરત્વપ્રતિકૂલોઽર્થઃ ॥

" અવોચામ રહૂગણા અગ્નયે મધુમદ્વચઃ " ઇતિ પુનસ્તસ્યૈવાર્ષે ॥ અત્ર વયં રહૂગણા અવોચામ મધુમદ્વચઃ ઇત્યાર્ષત્વાનુકૂલઃ પારમેશ્વરપ્રતિકૂલોઽર્થઃ ॥

" અચિકિત્વાંશ્ચિકિતુષશ્ચિદત્ર કવીન્પૃચ્છામિ વિદ્મને ન વિદ્વાન " ઇતિ દીર્ઘતમસ આર્ષે ॥ અત્ર અચિકિત્વાનહં ચિકિતુષઃ પૃચ્છામિ નવિદ્વાનહં કવીન્પૃચ્છામિ ઇતિ પારમેશ્વરત્વપ્રતિકૂલોઽર્થઃ ॥ ઋષિશ્ચેદહં મર્ત્યો નેદમસઙ્ગતં સ્યાત્ ॥ તસ્ય દર્શનાત્પ્રાગ્વિદ્યાયાઃ સમ્ભવે ન તદનુવાદસ્ય કર્તું શક્યત્વાત્ ॥ ઇદમુત્તરત્ર સ્પષ્ટં નિરૂપયિષ્યામઃ ॥ ઇદમીશ્વરસ્યાજ્ઞાનાનુપપત્તેશ્ચોદાહૃતે સ્થલે ॥

" પિતુર્યત્પુત્રો મમકસ્ય જાયતે " ઇતિ હિરણ્યસ્તૂપસ્ય આઙ્ગિરસસ્યાર્ષે ॥ અત્ર મમકસ્ય પિતુરિતિ પારમેશ્વરત્વસ્ય (પ્રતિકૂલોઽર્થઃ ॥

તરબેઃ પિતૈવ હિ અત્ર વિવક્ષિતઃ॥

"હૃદ્રોગં મમ સૂર્ય હરિમાણં ચ નાશય" ઇતિ પ્રસ્કણ્વસ્યાર્ષેણ અત્ર મમ હૃદ્રોગં હરિમાણં ચ નાશયેતિ પરમેશ્વરં પ્રતિકૂલોઽર્થઃ યત્તએવૈવ હિ હૃદ્રોગો હરિમા ચ॥ ઈશ્વરસ્ય રોગાનુપપત્તિર્વા દાહૃતે સ્થલે॥

"સં મા તપન્ત્યભિતઃ સપત્નીરિવ પર્શવઃ॥ નિ બાધતે અમતિર્નગ્નતા જસુર્વેર્ન વેવીયતે મતિઃ॥

"મૂષો ન શિશ્ના વ્યદન્તિ માધ્યઃ સ્તોતારં તે શતક્રતો॥,

"સકૃત્સુ નો મઘવન્નિન્દ્ર મૃળયાધા પિતેવ નો ભવ" ઇતિ કણ્વસ્યાર્ષે સૂક્તેઃ ઇતોઽપિ ભૂયસીનામનુપપત્તીનામુદાહરણં ભવતિ।

"અસૌ ચ યા ન ઉર્વરાદિમાં તન્વં૧ મમ॥ અથો તતસ્ય યચ્છિરઃ સર્વા તા રોમશા કૃધિ" ઇત્યપાલાયા આર્ષે॥

અત્ર અસ્મત્પક્ષ સમ્બન્ધિનોઽર્થા ત્રાબિકાયામેવ સઙ્ગચ્છન્તે ન પરમેશ્વરે।

૫ કર્તૃત્વાનન્વયઃ — યત્ર યત્ર મન્ત્રેષુ સૂક્તસ્ય તતોઽપિ કસ્યવા ભાગસ્ય કર્તા નિર્દિશ્યતે તત્ર તત્રેશ્વર નામ ન દૃશ્યતે। દૃષ્ટાનિ નામાનિ તુ આર્ષત્વાનુકૂલાનિ અત્ર કાનિચિદુદાહરણાનિ" એવા તે હારિયોજના

नोधस

"शुम्बन्तीन्द्र ब्रह्माणि गोतमासो अक्रन्" इति गौतमस्यार्षे।
~~इति~~ अत्र गोतमासो ब्रह्माण्यक्रन्निति आपिलानुकूलः
पारमेश्वरत्वप्रतिकूलोऽर्थः। अत्र त्वपिरामाणमेवाहि
परोक्षविधया बहुवचनेन गोतमास इत्याह।
लुप्तोपमप्रत्ययमिदं पदम्।
"सनायते गोतम इन्द्र नव्यमतक्षद् ब्रह्म हरियोजनाय।
सुनीथाय नः शवसान नोधाः प्रातर्मक्षू धियावसुर्जगम्यात्॥
इति पुनस्तस्यैवार्षे। अत्र गोतमो नोधाः ब्रह्म अतक्षत
इत्यापिलानुकूलः परमेश्वरत्वप्रतिकूलोऽर्थः। गोतम इति
लुप्तोपमप्रत्ययं पदमत्र बोध्यम्। यथा भृगुरिति शुक्र-
वाचकत्वे।
" अकारि त इन्द्र गोतमेभिर्ब्रह्माण्योक्ता" इति च
तस्यार्षे मन्त्रोदाहृतम्।
"एवाग्निर्गोतमेभिर्ऋतावा विप्रेभिरस्तोष्ट जातवेदाः।
इति गोतमस्यार्षे। अत्र गोतमेभिरग्निरस्तोष्टेति
आपिलानुकूलः परमेश्वरत्वप्रतिकूलोऽर्थः।
अत्र त्वपिरामाणमेवाहि परोक्षविधया बहुवचनेन
गोतमेभिरित्याह।

"तमुत्वा गोतमो गिरा रायस्कामो दुवस्यति" इति
तस्यैव पुनरर्थोदाहर्तव्यम्॥

"एतत्त इन्द्र वृष्ण उक्थं वार्षागिरा अभि गृणन्ति राधः॥
ऋज्राश्वः प्रष्टिभिरम्बरीषः सहदेवो भयमानः सुराधाः॥
इति ऋज्राश्वादीनां वार्षागिराणामार्षमत्र ऋज्राश्वः
अम्बरीषः सहदेवो भयमानः सुराधा इति वार्षागिराः
उक्थं अभिगृणन्ति इति आर्षत्वानुकूलः परमेश्वरत्व-
प्रतिकूलोऽर्थः॥

"दिवोदासेभिरिन्द्र स्तवानो वावृधीथा अहोभिरिव द्यौः॥
इति दैवोदासेः पारुच्छेपस्यार्षं॥ अत्र दिवोदासेभिः
स्तवानः इत्यार्षत्वानुकूलः पारमेश्वरत्वप्रतिकूलोऽर्थः॥
अत्रार्षेराख्यानमेव हि परोक्षविधया बहुवचनेन
दिवोदासेभिरित्याह॥ लुप्तोपमस्य प्रसत्यमिदं पदम्॥

"एवा ते गृत्समदाः शूर मन्मावस्यवो न वयुनानि तक्षुः॥
इति गृत्समदस्यार्षं॥ अत्र गृत्समदा मन्म तक्षुरित्यार्षत्व-
ानुकूलः, पारमेश्वरत्वप्रतिकूलोऽर्थः॥
अत्रार्षेराख्यानमेव परोक्षविधया बहुवचनेन गृत्समदा
इत्याह॥

“स्वायवो मतिभिस्तुभ्यं विप्रा इन्द्राय वाहः कुशिकासो अक्रन्॥”
इति विश्वामित्रस्यार्षे॥ अत्र कुशिकासो वाहः अक्रन्
इत्यार्षे त्वानुकूल्यः, पारमेश्वरं तु प्रातिकूल्योऽर्थः॥
अत्र ऋषिरात्मानमेव हि परोक्षविधया बहुवचनेन
कुशिकास इत्याह॥ तुल्यापत्यप्रत्ययमिदं पदम्॥
“विश्वामित्रस्य रक्षति ब्रह्मेदं भारतं जनम्” इति तस्यैव
पुनरार्षं चात्रोदाहर्तव्यम्॥
“अभित्वा गोतमा गिरानूषत प्रदावने॥ इति गौतमस्य
वामदेवस्यार्षे॥ अत्र गोतमा गिरा त्वामनूषतेति
आर्षे त्वानुकूल्यः, पारमेश्वरं तु प्रातिकूल्योऽर्थः॥
अत्र ऋषिरात्मानमेव हि परोक्षविधया बहुवचनेन
गोतमा इत्याह॥ तुल्यापत्यप्रत्ययमिदं पदम्॥
“तं त्वा सुशिप्र दम्पते स्तोमैर्वर्धन्त्यत्रयो गीर्भिः
शुम्भन्त्यत्रयः” इति आत्रेयस्य ससस्यार्षे॥
प्राग्वदत्रार्षे त्वानुकूल्यं पारमेश्वरं तु प्रातिकूल्यं॥
“एति प्राची विश्ववारा नमोभिर्देवाँ ईडाना हविषा
घृताची॥ इति विश्ववाराया आत्रेयिकाया आर्षे॥
“तस्मा उ ब्रह्मवाहसे गिरो वर्धन्त्यत्रयो गिरः शुम्भन्त्य-
(त्रयः॥ इत्यत्रेरार्षे॥

"श्यावाश्वस्तेस्तवित स्तोम नावशे ॥ इति श्यावाश्वस्य ॥
" अद्रिभो नो मरुतो गातुमेतन श्रोता हवं जरितुरेवया
मरुत् ॥ इति एवयामरुतः ॥ अत्र एवयामरुदिति
लुप्तषष्ठीकं पदम् ॥
" एवेदिन्द्रः सुते अस्तावि सोमे भरद्वाजेषु क्षयदि-
न्मघोनः ॥ इति भरद्वाजस्य ॥
" नू रोदसी अभिष्टुते वसिष्ठैः ॥ इति वसिष्ठस्य ॥
" इमा उ वः सुदानवो घृतं न पिप्युषीरिषः ॥
वर्धान्काण्वस्य मन्मभिः ॥ इति काण्वस्य पुनर्वत्सस्य ॥
" वैयश्वस्य श्रुतं नरा ॥ इति वैयश्वस्य विश्वमनसः ॥
" अयं वां कृष्णो अश्विना हवते ॥ इति कृष्णस्य ॥
" तां वां विश्वको हवते तनूकृथे ॥ इति विश्वकस्य ॥
" आ वां विश्वाभिरूतिभिः प्रियमेधा अहूषत ॥ इति प्रियमेधस्य ॥
" अरमश्वाय गायति श्रुतकक्षो अरं गवे ॥ इति श्रुतकक्षस्य ॥
" श्रुधी हवं तिरश्च्या इन्द्र यस्त्वा सपर्यति ॥ इति तिरश्चीनाम्नः ॥
" समीं रेभासो अस्वरन्निन्द्रं सोमस्य पीतये ॥ इति रेभस्य ॥
" पवते हर्यतो हरिर्गृणानो जमदग्निना ॥ इति जमदग्नेः ॥
" विमदेन यदीळिता नासत्या निरमन्थतम् ॥ इति विमदस्य ॥

"अध प्रियं शूषमिन्द्राय मन्म ब्रह्मकृतो बृहदुक्थादवाचि" इति बृहदुक्थस्य ॥

"शतं वा यदसुर्य प्रति त्वा सुमित्र इत्थास्तौद्दुर्मित्र इत्थास्तौत् ॥" इति नामतो दुर्मित्रस्य गुणतः सुमित्रस्य ॥

सन्त्येतादृशानि बहून्युदाहरणानि ॥ (अन्यानि च)

एषु सर्वेषु स्पष्टोऽर्थः आर्षत्वानुकूलः पारमेश्वरत्वप्रतिकूलः ॥

७ व्यवच्छेदकर्षिशैलीसादृश्यम् ॥ इदं चार्षत्वस्यानुकूलम् ॥ प्रतिकूलं च पारमेश्वरत्वस्य ॥ तद्यथा —

"प्रातर्मक्षू धियावसुर्जगम्यात्" इति प्रायः स्वसूक्तान्युप-संहरति नोधाः ॥

"तन्नो मित्रो॰ उत द्यौः" इति कुत्सः ॥

"विद्यामेषं वृजनं जीरदानुम्" इत्यगस्त्यः ॥

"बृहद्वदेम विदथे सुवीराः" इति गृत्समदः ॥

"यूयं पात स्वस्तिभिः सदा नः" इति वसिष्ठः ॥

एतद्दिङ्मात्रप्रदर्शनम् ॥

२

॥ आदिवेदमीमांसा ॥

॥ प्रामाण्यकाण्डे ॥

॥ प्रथमं प्रकरणम् ॥

॥ वेदापौरुषेयत्व खण्डनम् ॥

१ इन्द्रं विश्वस्य राजानं ब्रह्माणं ब्रह्मणां पतिम् ॥
आत्मानं सर्वभूतानां वन्द्यं वन्दामहे वयम् ॥

२
संशोध्य मन्त्रराशिं निधिमिव गुप्तं महान्तमार्याणाम् ॥
सारं परिगृह्णन्तः कुर्मो वयमादिवेदमीमांसाम् ॥

॥ मीमांसकमतानुवादः ॥

प्रत्यक्षानुमानवद् वेदाः प्रमाणमित्यत्र वैदिकमतानुयायिषु न कस्यापि विवादः ॥ कारणेषु परीक्षकाणां मतभेदो भवति ॥ तत्र मीमांसको ब्रूते ॥

"नित्यः शब्दः ॥ शब्दार्थसम्बन्धश्च नित्यः । अतः शब्दो ज्ञातसम्बन्धस्य श्रोतुः किमपि ज्ञानमुत्पादयेत् प ज्ञानं च स्वतः प्रमाणम् ॥ कारणदोषावधारणं तदपवादः । अन्यथा ह्यनवस्था स्यात् ॥ पौरुषेयेषु वाक्येषु

પુરુષબુદ્ધિસમ્ભવાત્ તજ્જન્યસ્ય જ્ઞાનસ્ય પ્રામાણ્ય-
મપોદિતં ભવિતું શક્યમ્ ॥ ન તથા વેદવાક્યજન્ય-
જ્ઞાનસ્ય । વેદાનાં કર્તુરનુપલબ્ધેર્હેતોઃ અપૌરુષેયત્વાત્ ।
સતિ હિ કારણે દોષશઙ્કાવકાશઃ ॥ નન્વસ્મિન્ પક્ષે પ્રકૃતે
જિજ્ઞાસિતાર્થઃ ઋગ્વેદઃ પૌરુષેય એવ ભવિતુમર્હતિ શાકલ-
શાખ્યાલિઙ્ગાદિતિ ચેત્ ન, પ્રવચનાદિયમાખ્યા ન કર્તૃ-
ત્વાત્ । પ્રવચનં ચ વિશિષ્ટમધ્યાપનં અનન્યસાધારણં
અધ્યયનં વા । ન વિશેષતઃ સર્વાણિ વાક્યાનિ પૌરુષે-
યાણિ વાક્યાર્થસ્ય પદાર્થેભ્યો ભિન્નત્વાત્ ॥ પદાર્થાનાં
પદસમ્બન્ધત્વેઽપિ વાક્યાર્થેઽપિ હિ પુરુષબુદ્ધિસમ્બદ્ધ
ઇતિ ચેત્ ન । પદાર્થેભ્યો વાક્યાર્થસ્યાભિન્નત્વાત્ ।

॥ પદનિત્યત્વખણ્ડનમ્ ॥

અત્ર વિચાર્યતે કિં પદાનાં નિત્યત્વાત્ શબ્દસ્ય નિત્યત્વમ્ ।
આહોસ્વિદ્ વર્ણાનામ્ ॥ નાદ્યઃ । સંસ્કૃતભાષાજન્યપ્રાકૃત-
પદાનાં સાદિત્વસ્ય પ્રસિદ્ધત્વાત્ ॥ ન કેવલં પ્રાકૃતપદાનામ્ ।
તજ્જન્યદેશભાષાપદાનાં ચ, નનુ સંસ્કૃતભાષાપદાન્યેવ
નિત્યાનિ તાવતા ચારિતાર્થ્યં વેદાપૌરુષેયત્વવાદિનઃ ઇતિ ચેત્ ।
તત્ર કિં પ્રમાણમિતિ પૃચ્છામઃ ॥ બલવત્પ્રમાણં વિના —

संस्कृतशब्दरूपाणि असङ्ख्यानि नित्यानीति कोवा
श्रद्दध्यात् ॥ १ ॥ नास्ति प्रत्यक्षम् ॥ आकाशादिवददर्शनात् ॥
प्रस्तुतप्रतिकूलं प्रत्यक्षम् । उत्पत्तिनिरोधदर्शनात् ॥
ननु अर्थप्रत्यायकत्वात् शब्दस्य नित्यत्वमनुमीयते ।
पूर्वमवस्थितेभ्य एव शब्देभ्यः अर्थप्रत्ययः उपपद्येत
न सांप्रतिकेभ्यः इति । यावुत्पत्तिनिरोधावुच्येते तौ
अभिव्यक्तितिरोधानौ । अत एव पदानि सृजामीति जनो
न प्रत्येतीति चेत् ॥

नेदमनुमानं स्यात् प्रभवेत् ॥ लिङ्गस्यानैकान्तिकत्वात् ॥
उत्पत्तिनिरोधवद्भिरपि शब्दैरर्थप्रत्ययादि नानुप-
पन्नः । एवंजातीयकः शब्दः एतस्मिन्नर्थे वर्तते इति
व्यवहारसौकर्याय सङ्केतः । उत्पत्तिनिरोधवतीभ्यो
हस्तचेष्टाभ्योऽप्यर्थप्रत्ययो लोके दृश्यते ।

लघुत्वात् शब्देनैवार्थ~~[illegible]~~ प्रत्यायनमाश्रियन्ते
जनाः ॥ तदुक्तमाचार्येण यास्केन ॥ "अणीयस्त्वाच्च
शब्देन संज्ञाकरणं लोके" इति (नि. १,२।)

अपि च संस्कृतभाषापदानां तत्तदर्थप्रत्यायकत्वं
लिङ्गम् । प्राकृतदेशभाषापदानामर्थप्रत्यायकत्वेन सह
(तुल्ययोगक्षेमम् ॥

ननु एकेनोच्चारणयत्नेन संव्यवहारोऽर्थसम्बन्धश्च
न शक्यते कर्तुमिति चेत्। य उच्चारयति न सोऽर्थ-
सम्बन्धं करोति। सङ्केतान् विज्ञाय निजमभिप्रायं
परस्मै प्रकटयितुं शब्दान् प्रयुनक्ति॥ अनुवदति वा
सङ्केततोऽर्थबोधकं परकीयं वाक्यम्॥ तत्र ज्ञातसङ्के-
तस्यैव श्रोतुरर्थप्रत्ययः स्यात्॥ नाज्ञातसङ्केतस्य॥
निसर्गत एव यदि शब्दोऽर्थं बोधयेत् अज्ञातसङ्केत-
स्यार्थं गृह्णीयात्॥ लोके पित्रादिभिः कृतानि मनुष्य-
व्यक्तिनामानि शास्त्रेषु शास्त्रकारैः कृतानि पारिभाषिक-
पदानि च सङ्केतबलादेवार्थं बोधयन्ति दृश्यन्ते॥
तस्मान्न वक्तुं शक्यं मनुष्यैः शब्दानामर्थसम्बन्धः कर्तु-
मशक्य इति॥ अर्थप्रत्यायनाय शब्दसङ्केतानकार्षुः
केऽपि पूर्वे महान्तः पुरुषाः॥ न तेऽपि च परिणामेन
व्यवहारधारायाम्॥ सङ्केतानां वैविध्यान्मूलभाषा-
वैविध्यम्॥ परिणामाद् भाषातो भाषान्तरोत्पत्तिः॥
एतत्सर्वं भाषातत्त्वपरीक्षकैर्बहुभिरनुमाननिदर्शनैर्विस्ता-
रितमिति नात्र वितन्यते॥ संस्कृतभाषापरिणामस्य
दिङ्मात्रमुत्तरत्र प्रदर्शयिष्यामः॥

वर्णानामुत्पत्तिपक्षे शब्दरूपजातिषु सङ्केतग्रहः। अस्मिन्-
पक्षे शब्दस्योच्चारणं नामकरणम्। तत्सजातीयशब्द-
संस्कारस्तत्रनिमित्तमात्रमेव भवेत्॥
अभिव्यक्तिपक्षेऽपि न पदानां नित्यत्वम्॥ वर्णानामानु-
पूर्व्येण अभिव्यञ्जनस्य पुरुषायत्तत्वात्। वर्णा एव हि
तिष्ठन्ति अपि नः। न पदानि। वर्णेभ्यः पदानि नाति-
रिच्यन्त इति चेत्। सत्यम्॥ अत एव वर्णेभ्यः पृथग्-
न तिष्ठन्ति स्वतन्त्रतया पदानीति ब्रूमः॥ यदिदमभिहितं
शब्दवैभवम्॥ स वर्णप्रस्तारस्य महिमा। वर्णप्रस्तारश्च
आनुपूर्व्येण वर्णाभिव्यञ्जने प्रतितिष्ठति। आनुपूर्व्येण
अभिव्यञ्जनं च पुरुषायत्तम्। तस्मादनित्यानि
पदानीति सिध्यति। पदानि सन्तु नाम वर्णक्रम-
निबन्धानि नित्यत्वम्॥ तथापि पदस्थवर्णनित्यत्वात्
पदानि नित्यानीति यदि आग्रहः। अस्तु नाम तादृशं
निरुपद्रवं नित्यत्वम्। तच्च प्राकृतदेशभाषापदेषु
मनुष्यव्यक्तिनामसु वृद्धिगुणादिषु पारिभाषिक-
पदेषु निरर्थकेषु खपुष्पडित्थादि शब्दरूपेषु च
तुल्यम्॥

॥ पदस्य वर्णातिरिक्तत्व साधनम् ॥

वस्तुतस्तु व्यापकानां वर्णानां नाभिव्यक्तिरुच्यते;
सा च यथादेशं वर्णैकदेशभूतानां तरङ्गाणां विवर्तो
न पूर्वाणां वर्णानाम्। यदि व्यापकानां वर्णानां पूर्ण-
तयाऽभिव्यक्तिरिष्येत तर्हि कश्चिदुच्चार्यमाणं
शब्दं सर्वत्र सर्वः गृह्णीयात्। स च तरङ्गो निमित्त-
व्यापारवशात् वायुवशात् जलाशय इव व्यापकाद्वार-
महोदध्यावुत्पद्यते। तालवृन्तचालनवशान्महा-
वायौ वायुतरङ्गवद्वा। यथा जलतरङ्गो जलमयः,
तथा वर्णतरङ्गो वर्णमयः इति न पृथग् विवर्तमप
निमित्तव्यापारशान्तौ स वर्णतरङ्गः स्वप्रकृतिभूते
वर्णे विलीयते, यथा वायुव्यापारशान्तौ जलाशय-
तरङ्गः। यथा वा तालवृन्तव्यापारशान्तौ वायुतरङ्गः।
यत्रावरणापगमेनाभिव्यक्तिः तत्र तथास्थितस्य
पूर्णस्य एकदेशस्य वोपलब्धिः सूर्यवत्॥
यत्रकर्मेन्द्रियव्यापारेणान्येन वा तादृशेनाभिव्यक्तिः
तत्र सूक्ष्मतः स्थूलतरङ्गप्रादुर्भावो वायोर्वायुवत्"
वर्णविषये न वयं कमप्यावरणापगममनुजानीमः प